a anjali
Mahabhasyavarrajipodyotah

PK
531
A15
1899
v.1
pt.3

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 958.



महाभाष्यप्रदीपोद्योतः ।

MAHĀBHĀṢYAPRADĪPODYOTA

BY

NĀGEÇA BHAṬṬA

EDITED BY

PANDIT BAHUVALLABHA ÇĀSTRI.

VOL. I, FASCICULUS III.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1900.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA.

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
*[illegible]i Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēva Āraṇyaka of the Ṛg Vēda, (Text) Fasc. 1–5 @ /6/ each ...		1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/		7	8
Anu Br[illegible]n, (Text) Fasc. 1–5 @ /6/ each		1	14
Aphorisms of Śāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dipikā Vol I, Fasc. 1		0	6
Brahma Sūtra, (English) Fasc. 1		0	12
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each		2	4
Catalogue of Sanskrit Book MSS. in the Society's Library, Fasc. I. ...		2	0
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each		19	14
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–14 @ /6/ each ...		4	2
* Ditto Lāṭyāyāna, (Text) Fasc. 1–9 @ /6/ each		3	6
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1–4		1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–3 @ /6/ each		0	12
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each		4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smṛti, (Text Fasc. 1–3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1–4 @ /6/		1	8
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...		5	4

षष्ठीति । (कै)

योगविभागे च

षष्ठीति (पा)

सूत्रं साकाङ्क्षमिति लौकिकोऽपेक्षा लक्षणोऽधिकार इतिभावः ॥

योग्यत्वादिति । (कै)

व्याख्यानाच्चेत्यपि बोध्यम् ॥

उपतिष्ठत इति । (कै)

अनुवर्त्तत इत्यर्थः ॥

अन्यतरार्थमिति । (कै)

केवलविधित्वे पुनर्गुणवृद्धिग्रहणवैयर्थ्यमुक्तमेव ॥

न तु वाक्यभेदेनेति । (कै)

एकवाक्यत्वे सम्भवति तस्यायुक्तत्वमिति भावः । एतेन

[1]इग्यण (पा)

इत्यपि व्याख्यातम् । तत्रापि संज्ञाविधाने इगनुवाद्यः । अनुवाद्यत्वं च

[2]ष्यङः सम्प्रसारणम् (पा)

इत्यादीनां सार्थक्यायावश्यकम् । एवं चैकरूप्यायानुवाद्यत्वमेवास्तु न तु विधेयत्वं

---

१ अ १ । पा १ । सू ४५ ॥
२ अ ६ । पा १ । सू १३ ॥

[1]वचिस्वपी- (पा)

त्यादीनां नियामकत्वापादकमिति बोध्यम् ॥

तदपेक्षिष्यामह इति । (कै)

एवञ्च यथा विधेः स्वान्याकाङ्क्षा तथास्यापि स्वसम्बन्धिविधेयबोधकशास्त्रापेक्षेति [2]एकवाक्यतयैवेति भावः । एवं च स्वातन्त्र्यन्दूरापास्तमेव । तदाह

अस्येति । (कै)

आवृत्तौ तु न मानम् इति शिवम् ॥

इति शिवभट्टसुतसतीगर्भजनागेशभट्टकृते महाभाष्यप्रदीपोद्योते प्रथमाध्यायस्य प्रथमपादे तृतीयमाह्निकम् ॥

---

१ अ ६ । पा १ । सू १५ ॥ २ एकवाक्यतैवेति भावः । क ॥

महाभाष्यप्रदीपोद्योतः ॥

न धातुलोप आर्धधातुके । १ । १ । ४ ॥

प्राधान्यादिति ॥ (कै)

[1]प्राधान्यञ्च संस्कार्य्यत्वरूपम् ॥

असम्बद्धमिति ॥ (कै)

[2]अलोऽन्त्यस्य (पा)

इत्यनेनापि टक एव प्रसक्त्या परिभाषानिषेधे वैयर्थ्यम्[3] ॥

क्तस्नस्येति । (कै)

[4]दुरीणो लोपश्च (उ)

इति रक्सन्नियोगेन क्तस्नधातुलोपोऽस्तीति तदसम्भवो नोक्तः ॥

अथवेति । (कै)

आद्यपक्षे अवयवधर्मस्य समुदाय आरोपोऽन्त्ये समुदायधर्मस्य प्रवृत्तिनिमित्तस्य अवयवे आरोपितत्वमिति भेदः ॥

---

१ प्राधान्यं – गुणवृद्धिविधिनिष्ठम् ॥

२ अ १ । पा १ । सू ५२ ॥

३ वैयर्थ्यमिति । दीधीवेवीटामित्यस्य । १ । १ । ६ ॥

४ उ—पा २ । सू १७७ ॥

परामर्शः । (कै)

शब्देन पृथगुपादानम् ॥

प्रतिपादितमिति । (कै)

बुद्ध्या पृथङ्निष्कर्षादिति भावः ॥

लोपविशेषणमिति । (कै)

सूत्रे श्रुतत्वादिति भावः ॥

सिद्धान्तेत्विति । (कै)

निषेध्यत्वेन गुणवृद्ध्योः शाब्दप्राधान्याल्लोपस्य तद्विशेषणत्वादिति भावः । न च लोपशब्दोऽधिकरणघञन्तः ।

[1]अदर्शनं लोप (पा)

इत्यादौ भावसाधनस्यैव प्रसिद्धत्वात् । गणे सानुबन्धस्य पाठाद् विशिष्टस्यैव धातुत्वं स्यादत आह

अनुबन्धविति ॥ (कै)

यस्मादिति । (कै)

उपदेशपदाभावेऽपि अन्तरङ्गत्वात् सर्वतः पूर्वं सा । धातुसंज्ञा तु प्रत्ययविशेषे विधित्सित इति भावः ॥ धातुसंज्ञेत्संज्ञयोः समकालत्वेऽपि न चतिरित्याह

---

१ अ १ । पा १ । सू ६० ॥

लूशब्दस्यैवेति । (कै)

अन्वयव्यतिरेकाभ्यां तस्यैव क्रियावाचित्वावगमात् । गणपठित-क्रियावाचिनां च धातुत्वविधानादिति भावः ॥

रोरवीतीति । (भा)

यङ्लुगन्तस्य रूपम् ॥

शब्दवत्त्वात् । (कै)

शब्देनोपादानात् ॥

नान्यथेति । (कै)

अन्यथाऽन्तरङ्गत्वात् तत्पुरुष एव स्यादित्यर्थः ॥ ननु पद-प्रयोजनचिन्ता वृत्तिकारस्योचिता न भाष्यकारस्येत्यत आह

क्रमेणेति । (कै)

तत्तत्पदप्रयोजनक्रमेणेत्यर्थः ॥ क्रममेवाह

आर्द्धधातुकस्य चेति ॥ (कै)

लोपविशेषणं श्रुतत्वाद् । गुणादिविशेषणं प्राधान्यात् । तच्च लोप विशेषणत्वे आर्द्धधातुके परे पूर्वस्य धात्वंशस्य लोप इति वाच्योऽर्थस्तत्फलितमुक्तं भाष्ये

आर्द्धधातुकनिमित्ते लोप इति ॥ (भा)

एवं गुणवृद्धिविशेषणत्वे आर्द्धधातुके[1] प्रत्यासत्त्या पूर्वस्य धातो-

र्ये गुणवृद्धी (भा)

इति वाच्योऽर्थः । अनुवादेऽपि

---

१ अत्र "परे" इत्यधिकम् । क । ख । ग ॥

(न धातुलोप आर्द्धधातुके । १। १। ४।) (अ. १। पा. १। आ. ४)

[1]इको गुणवृद्धी (पा)

[2]अचश्च (पा)

इति परिभाषातिरिक्तपरिभाषाणां प्रवृत्तिस्वीकारात्। तत् फलितमुक्तम्

आर्द्धधातुकनिमित्ते ये इति ॥ (भा)

प्राप्नुत (भा)

इत्यनेन प्रसक्तस्यैव निषेध इति सूचयति।

बहुव्रीहीति। (कै)

उभयानुग्रहायेति भावः ॥ यद्यपि धातुलोप इति समस्तमार्द्धधातुकविशेषणं तथापि विशेषणशब्दः परिच्छेदकपर इति न दोषः ॥

नन्वाद्गुण[3] इति। (कै)

नन्विक्स्थानिकत्वादयमपीग्लक्षणः। नचाचाप्यनुवृत्तमिक इति स्वरूपपरम्। उत्तरसूत्रे इव स्वरूपपदार्थकत्वव्यवस्थापक[4]शब्दाभावादिति चेन्न।

[5]इको गुणवृद्धी (पा)

इति सम्पूर्णमनुवर्त्त्य यत्रेदन्तत्व न धात्वित्युपतिष्ठत इत्यर्थेनास्यापि

---

१ अ १। पा १। सू ३ ॥ २ अ १। पा २। सू २८ ॥
३ अ ६। पा १। सू ८७ ॥
४ व्यवस्थापक च शब्दाभावाद् – । ख। म। क ॥
५ अ १। पा १। सू ३ ॥

परिभाषालाङ्गीकार इति भावात् । यदा । यच्चेदं तद्विहिते गुणवृद्धी नेत्यर्थः ॥ तदक्ष्यति । यच्चेक् परिभाषा व्याख्रियते तत्रायं निषेध इति ॥

[1]इक्प्रकरणादिति (भा)

भाष्यप्रतीके अर्थाधिकारेण स्वरूपपरस्येवेक इत्यस्यानुवर्त्तनाद्वा ॥

यदेति । (कै)

[2]"पूर्वं धातुः साधनेने"ति सिद्धान्तपक्ष इत्यर्थः ॥

यदा त्विति । (कै)

[3]"पूर्वं धातुरुपसर्गेणे"ति पक्षे पूर्वमेव जातस्य निषेधायोगादिति भावः ॥

बहिरङ्गस्यासिद्धत्वादिति । (कै)

द्वितीये बहिरङ्गनिमित्तस्यासिद्धत्वाद् विधिप्रवृत्तिकालेऽनिष्पन्नत्वान्निषेधाप्राप्त्येष्टसिद्धिरित्यर्थः ॥ एतेन जातस्य बहिरङ्गस्यान्तरङ्गे कर्त्तव्येऽनेनासिद्धत्वप्रतिपादनेऽपि जातेऽन्तरङ्गे पश्चात् प्राप्तबहिरङ्गस्यानेनासिद्धत्वप्रतिपादने मानाभावः फलाभावो ज्ञापकविरोधश्चेत्यपास्तम् ॥ परं त्वयं पक्षः

---

१ "इक्प्रकरणाद्गुणोपे वृद्धिः" इत्यत्रैवाग्रिमभाष्ये वक्ष्यति ॥

२ परिभाषेन्दुशेखरे द्रष्टव्यम् ॥

३ परिभाषेन्दुशेखरे द्रष्टव्यम् ॥

[1]सुट् कात्पूर्व (पा)

इत्यादि सूत्रेषु भाष्ये दूषित इति भाष्योक्तमेव सम्यक् ॥

नन्विति । (कै)

इयं च

[2]षत्वतुकोरिति- (पा)

सूत्रेण ज्ञापिता । अन्यथा बहिरङ्गासिद्धत्वेनैव सिद्धे तद्वैयर्थ्यं स्पष्टमेव ॥

अचोरिति (कै)

द्वित्वमविवक्षितम् । धर्मिग्राहकमानस्य तथैव सत्त्वात् ॥

अनुपस्थानम् (कै)

इत्यस्याचेत्यादिः[3] ॥

तच्च हीति । (कै)

ततश्च यण्वडसिद्धो नेत्यर्थः । तेनासिद्धपरिभाषाया अनित्यत्वं ज्ञाप्यते । अत एव भाष्ये [4]विप्रतिषेधसूत्रभिन्नस्थले न काप्ये-

---

१ अ ६ । पा १ । सू १३५ ॥

२ अ ६ । पा १ । सू ८६ ॥

३ अचेत्यादिरिति । प्रदीपे अनुपस्थानपदेन "नाजानन्तर्थ्यति" परिभाषाया अनुपस्थानं बोध्यत इति मत्वेदम् । यदि तु अन्तरङ्गपरिभाषाया अनुपस्थानं गृह्यते अत एव अन्तयूमित्यादयुक्तरग्रश्यमङ्कृतिरित्युच्यते तदा त्वचेति शेषो नापेक्षितः ॥

४ विप्रतिषेधे परं कार्यम् । अ १ । पा ४ । सू २ ॥

(अ. १। पा. १। आ. ४) (न धातुलोप आर्द्धधातुके । १। १। ४।)

तदुल्लेखो यथाऽभिद्रुपरिभाषाज्ञापकं विप्रतिषेधसूत्रे उक्तमपि पुन-

[1]र्वाह ऊठ् (पा)

सूत्रे उक्तमिति विवरणकृतः ॥

अस्मिन्निति । (कै)

निषेधस्य प्राप्तिपूर्वकत्वात् पश्चात् प्रवर्त्तमाने इत्यर्थः ॥ क्नूय्-धातोर्णिचि पुक्कि

[2]लोपो व्योरिति (पा)

यलोपः । वाक्यकारः सूत्रेऽव्याप्तिव्याप्तिपरिहाराय [3]परिगणन-माह भाष्ये

परिगणनमिति । (भा)

अत्र

[4]यस्य हल इति (पा)

लोपः [5]समुदायलोप इति मत्वा "यक्क्ययोः" परिगणनं [6]"वेभिदिता" इत्युदाहरणं च बोध्यम् ॥ ननु भञ्जिरञ्जेरौपदे-शिकनस्यैव

---

१ अ ६ । पा ४ । सू १३२ ॥ २ अ ६ । पा १ । सू ६६ ॥

३ परिगणनमिति भाष्ये । क ॥ ४ अ ६ । पा ४ । सू ४६ ॥

५ समुदायलोप इति मत्वेति । वर्णलोप इति पक्षेतु अल्लोपस्य स्थानि-वद्भावादेव न गुणादि प्राप्तिः ॥

६ वेभिदितेति । अस्यापि यङन्ततया वर्णलोपपक्षे अल्लोपस्य स्थानि-वद्भावादेव गुणाभावः सिद्ध्येत् । यङ्लुगन्तस्तु नेदम् तत्र लुक आर्द्ध-धातुकनिमित्तत्वाभावेन निषेधाप्राप्तेः । अनारम्भो वेत्युपक्रम्य कथं "वेभिदितेति" अकारलोपे कृते तस्य स्थानिवद्भावादित्युत्तरभाष्य-विरोधाच्च । "मरीमृज" इत्यत्र तु "यङोऽचि चेति" लुक् समुदाय-स्यैव भवतीति नास्ति तत्र स्थानिवद्भावसम्भावना ॥

[1]भञ्जेश्च चिणि (पा)

[2]रञ्जेश्च (पा)

[3]घञि च (पा)

इत्यादिना लोप इति नुम्लोप इत्यसंगतमत आह

नुमितीति ॥ (कै)

नन्वनिदिद् वृद्धिणा इदं सिद्धमत आह

वृद्धि वृद्धाविति । (कै)

स नास्त्येवेति पूर्वपक्षाशयः ॥

जडादेश इति । (कै)

[4]ज्वरत्वरस्रिव्वी- (पा)

त्यनेन ॥ भाष्ये

इत्यचापि प्राप्नोतीति । (भा)

वृद्धिरिति शेषः ॥ न प्राप्नोतीति पाठे निषेध इति शेषः ॥

निपातनादिति । (भा)

[5]स्यदो जवे (पा)

---

१ अ ६ । पा ४ । सू ३३ ॥

२ अ ६ । पा ४ । सू २६ ॥

३ घञिच भावकरणयोः । अ ६ । पा ४ । सू २७ ॥

४ ज्वरत्वरस्रिव्यविमवामुपधायाश्च । अ ६ । पा ४ । सू २० ॥

५ अ ६ । पा ४ । सू २८ ॥

[1]अवोदैधौद्म्रप्रश्रथहिमश्रथाः (पा)

इति निपातनम् । अस्य नलोपमात्रफलकत्वे नलोपविधानेनैव सिद्धे निपातनवैयर्थ्यापत्तिरिति भावः ॥

तेनेति । (कै)

अन्यथा

[2]ओर्गुणः (पा)

इत्यादावपि परिभाषाप्रवृत्तौ तस्यापौग्लक्षणत्वे "लैगवायन" इत्यादौ निषेधः स्यादिति भावः ॥

यत्रेक्परिभाषेति । (कै)

नचेक इत्यनुवर्त्त्यको न ते इत्येव व्याख्यानमुचितमिति वाच्यम् । "मरीमृजः" "सरीसृप" इत्यादाविकः प्रत्ययाव्यवहितपूर्वत्वाभावान्निषेधानापत्तेः । तदाह भाष्ये

इग्लक्षणयोरिति । (भा)

यथैतदर्थलाभस्तथोक्तम् । इक्परिभाषालक्षणयोरिति तदर्थः ॥

लोपेति । (कै)

प्रत्ययाश्रयत्वादिति (भा)

भाष्यस्य लोपे आर्द्धधातुकप्रत्ययनिमित्तकत्वाश्रयणादित्यर्थ इति भावः ॥

---

१ अ ६ । पा ४ । सू २९ ॥
२ अ ६ । पा ४ । सू ४७ ॥

न प्रत्ययेति । (कै)

प्रत्ययस्याश्रुतत्वादनाच्चिप्तत्वाच्चेति भावः ॥ अवश्यं जौरदानुग्रब्दस्यैवमेव[1] व्युत्पत्तिः कार्य्येत्याह

एवं चेति । (कै)

अवान्तरपदत्वे सत्येवावग्रह इत्युत्सर्गादिति भावः ॥ ननु रदानुप्रत्यये रेफाकार उदात्तः समासे त्वन्तोदात्तः स्यादत आह

बह्विति । (कै)

जौरस्य प्रत्ययस्वरेणान्तोदात्तस्य बहुव्रीहौ पूर्वपदप्रकृतिस्वरेणेत्यर्थः । जौवेर्विचि तु गुणनिषेधो भवत्येव ॥ एतेनार्द्धधातुकत्वेन यच लोपे निमित्तता तत्रैव लोपे निषेध इत्यपास्तम् । वार्त्तिकविरोधात् ।

[2]यङोऽचि च (पा)

इत्यत्रापि तत्त्वेनानिमित्तत्वा "क्ष्णोलुव" इत्याद्यसिद्ध्यापत्तेश्च । धिव्यादिभ्यस्तु विजभाव एव । भाष्ये

यावता चेदानीमिति । (भा)

किंत्वेन गुणनिषेधादिति भावः । अत्र वलोपो

[3]लोपो व्यो- (पा)

रित्यनेन । इदं च यथाश्रुतसूत्रमते । वलोपप्रत्याख्याने तु

---

१ अवश्यं जौरदानुग्रब्दस्यैवं व्युत्पत्तिः कार्य्येत्याह — । क ॥

२ अ २ । पा ४ । सू ७४ ॥

३ अ ६ । पा १ । सू ६६ ॥

(अ. १। पा. १। आ. ४) (न धातुलोप आर्द्धधातुके । १। १। ४।)

[1]रकि ज्य (भा)

इत्येव शरणम् ॥

पक्षद्वयेऽपीति (कै)

तन्त्रेणोभयविशेषणत्वपक्षेऽपीत्यपि बोध्यम् । गुणो ण्याश्रयो णिलोपो यगाश्रयः ॥

अपवादेति । (कै)

"[2]प्रकल्प्य चापवादविषयमिति" परिभाषयेति भावः । एतेन गुणप्रतिषेधौ यत्र समानकालौ तत्र चरितार्थो निषेधो नान्तरङ्गं गुणं बाधितुं क्षमत इत्यपास्तम् ॥ न च

भेद्यते (भा)

इत्यत्र

[3]अचः परस्मिन्निति (पा)

णिलोपस्य स्थानिवत्त्वेन तत्राभावातिदेशस्य च सत्त्वेन स्थानिनि णिचि सति अभवतो निषेधस्य लोपेऽप्यभावातिदेशान्न दोष इति वाच्यम् । स्थानिवद्भावाश्रयणे सूत्रप्रत्याख्यानमेवेति तदनाश्रयणेन सूत्रवत् तदनाश्रयणेनैवायं दोष इत्याशयात् ॥ भाष्ये

तस्मादिग्लक्षणा वृद्धिरिति । (भा)

प्रतिषेध्येति शेषः ॥ अत एवाभाजीत्यादिसिद्धिरिति भावः ॥

---

१ "रकि ज्यः सम्प्रसारणम्" इत्यत्रैव भाष्ये ॥

२ परिभाषेन्दुशेखरे स्पष्टम् ॥

३ अ १ । पा १ । सू ५७ ॥

अकारलोप इति । (भा)

[1]अतो लोप (पा)

इत्यनेन ॥ यङ्लुगन्ताण्णिचि तु सूत्रमतेऽपि निषेधो न । आर्द्धधातुकनिमित्तलोपाभावात् ॥

मरीमृजक इति । (भा)

अचाल्लोपस्य स्थानिवत्त्वे

क्ङिति यजादौ वेष्यते (वा)

इति विकल्पो न । व्यवस्थितविभाषाश्रयणात् ॥ नन्वेवं लुक्-श्रास्त्वं व्यर्थं स्यादत आह

कृतेऽपीति । (कै)

अवशिष्टे तच्चरितार्थमिति भावः ॥ भाष्ये

लुकि कृते इति । (भा)

अनवकाशत्वा"[2]दन्तरङ्गानपीति"न्यायाच्च लुकि कृतेऽतो लोपो न प्राप्नोतीत्यर्थः ॥ इतर आश्रयानभिज्ञ आह

परत्वादिति । (भा)

[3]ननु यस्य लोपः कृतस्तस्य लुगप्राप्तेराह

---

१ अ ६ । पा ४ । सू ४८ ॥

२ "अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते" इति ॥ परिभा – । ५३ ॥

३ ननु इत्यनन्वितमिति ग्रन्थकर्त्तुरनवधानम् ॥

(अ. १ । पा. १ । आ. ४) (न धातुलोप आर्द्धधातुके । १ । १ । ४ ।)

लुक् शास्त्रेति ॥ (कै)

गौणत्वादिति । (कै)

अतिदेशविषये गौणत्वाङ्गीकारेऽतिदेशवैयर्थ्यापत्तेरिदं चिन्त्यम् । किञ्च भिन्नविषयेऽपि बाध्यबाधकभावो दृष्टः । यथा

[1]व्यथो लिटीति (पा)

संप्रसारणस्य वकारे चारितार्थ्येऽपि हलादिः शेषबाधकता । भाष्यकारोऽपि

[2]मिदचोऽन्त्यादि- (पा)

त्यस्य विषयभेदेऽपि प्रत्ययपरत्वबाधकतां वक्ष्यति । तस्मात् कृते चारितार्थ्येऽपि तत्प्राप्तिकालेऽवश्यं प्राप्त्याऽपवादत्वं भवत्येवेत्याशयः ॥

असम्भव एव बाधकत्वम् (भा)

इति वार्त्तिकानुयायिना

सावकाशो लुक् (भा)

इत्युक्ते स एव

अथापी- (भा)

त्याहेति तदुक्तिः कथञ्चिदिति ॥ भाष्ये

---

१ अ ७ । पा ४ । सू ६८ ॥

२ अ १ । पा १ । सू ४७ ॥

अत इत्येवेति । (भा)

[1]अलोऽन्त्य- (पा)

परिभाषया अत इत्यनुवृत्तेर्वेति भावः ॥ [2]अयं च लुक्कोऽपवादः । एवञ्चार्थादवशिष्टस्य लुगिति बोध्यम् । अत्र

[3]भ्रस्जो रोपधेति (पा)

सूत्रादन्यतरस्यां ग्रहणस्य मण्डूकप्लुत्यानुवर्त्तनेन योगविभागस्येष्टसिद्ध्यर्थत्वेन च क्वचिदेव पृथगल्लोपो न सर्वत्रेति बोध्यम् ॥

मरीमृज (भा)

इत्यत्र विकल्पस्तु न । व्यवस्थितविभाषाश्रयणात् । यद्वा तत्र विकल्प इष्ट एव । तदर्थं सूत्रकृतोऽप्येतत्कल्पनावश्यकत्वं मनसि निधायैव तामाश्रित्य सूत्रप्रत्याख्यानमेव वरमिति भाष्याशयः ॥ लोलुवादावुवङि अनादिष्टादचः पूर्वस्य विधेरभावेन स्थानिवत्त्वाभावेऽपि नोपधागुणः । अचः पूर्वत्वेन दृष्टल्लोल्लक्षणात् परस्य गुणे कर्त्तव्ये पञ्चमीसमासेनाल्लोपस्य स्थानिवद्भावसौलभ्यात् । निमित्तत्वेनाश्रितात् पूर्वस्मादित्यर्थे तु न मानम् । अतिप्रसङ्गस्य तदनित्यत्वेनैव परिहारात् ॥ भाष्यानुक्तत्वात् तदनित्यत्वाभावेऽपि पूर्वस्मात् परस्याव्यवहितस्यैव ग्रहणेन हे गौरित्यत्रादोषः । अचः पूर्वत्यंगे स्वरग्रहणाद् भाष्यप्रामाण्याच्चाव्यवधानांशवाधेऽप्यत्र तद्वा-

---

१ अ १ । पा १ । सू ५२ ॥ २ अत्र च । क । ग ॥
३ भ्रस्जो रोपधयो रमन्यतरस्याम् । अ ६ । पा ४ । ४७ ॥

(अ.१।पा.१।आ.४) (न धातुलोप आर्द्धधातुके।१।१।४।)

धे मानाभावात्। अतिदेशप्रवृत्तिप्राक्कालिकं च तदंगेऽव्यवधानं निविष्टम्। किञ्चाणास्त्रीयस्यापि तस्य "तत्स्थानापन्ने तद्धर्मलाभ इति" लोकन्यायेनातिदेश इति स्थानिवत्सूत्रे वक्ष्यते। लोलू इत्यस्य लोलुवादेशस्तस्य च गुणघटितो लोलोवित्यादेश इत्याशः॥

दरीदृश इत्यत्राङ् निमित्तगुणस्तु न। अस्याङस्तत्कैंकगोचरत्वेन लाक्षणिकतया अङ्ग्रहणेनाग्रहणात्। अत एव दरीदृशक इत्यादौ यङन्ताद् ण्वुलि अङ्निमित्तगुणाभावः॥ जङ्गमक इत्यादौ यङन्ताद् ण्वुलि उपधालोपश्च। अनङीति निषेधाप्रवृत्तेः। जङ्गम इत्यादौ तूक्तयुक्त्या समुदायलुगेवेति न दोषः॥ निजेगिल इत्यादौ

[1]ग्रो यङीति (पा)

नित्यं लत्वमिष्टमेव। सूत्रमतेऽपि

[2]न लुमतेति (पा)

निषेधस्यानित्यत्वाद् यङ्परत्वमस्ति।

[3]नवेति विभाषेति (पा)

सूत्रे भाष्ये चेदं ध्वनितमिति तत्रैव निरूपयिष्यामः। यदि "जरीगृह्यादेः" "सास्मर्यतेश्चा"त्रि[4] सम्प्रसारणगुणाविष्टौ तर्हि सूत्रमतेऽपि

---

१ अ ८।पा २।सू २०॥ २ अ १।पा १।सू ९३॥

३ अ १।पा १।सू ४४॥

४ सम्प्रसारणयङित्रेति गुणाविष्टौ। क।ग॥

"न [1]लुमतेति" निषेधानित्यत्वेन साधनीयौ भाष्यप्रामाण्यादिष्टाविति गम्यते । अत एव पृथगल्लोपे यङो विषयापहाराभावेन अजेर्व्यदेग्धे यणि "वेव्य" इति स्यादित्यपास्तम् । योगविभागस्य क्वाचित्कत्वेन तत्र लुक एव प्रवृत्त्याऽऽचतेः । [2]पुर्वादिभ्यो वान्तेभ्यो विज् नास्त्येव । [3]अनभिधानात् । इदं च

[4]लोपो व्योरिति- (पा)

सूत्रे भाष्ये ध्वनितम् । एतद्भाष्यविरुद्धप्रयोगाणां भाष्यानुक्तानामनभिधानमित्यन्ये ॥ न चैवं "न धातुलुक्यची"त्येव सिद्धे आर्द्धधातुकग्रहणं व्यर्थमिति वाच्यम् । लोपार्द्धधातुक इत्येव षष्ठीतत्पुरुषेण लोपनिमित्तार्द्धधातुक इत्यर्थेन लूञादेर्व्यावृत्तिसिद्धौ धातुग्रहणवत् तस्यापि सत्त्वात् ॥ भाष्ये

लुकं वक्ष्यतीति । (भा)

लुगतो लोपापवादः । अपवादश्च प्रायेण पश्चाद्भावीति भवि-

---

१ अ १ । पा १ । सू ६३ ॥

२ ननु पुर्वधातोर्विचि "वेरपक्त" लोपाद् वलि लोपो वलीयान् इति धातुवकारलोपे सूचरुत्वे तेन गुणनिषेधाद् "हलि चे"ति दीर्घे पूरित्येव भवति । प्रत्याख्याने तु पोरिति स्याद् अत आह पुर्वादिभ्य इति ॥

३ अनभिधानादिति । इदं प्रत्याख्यानपरं भाष्यमेव पुर्वादिभ्यो विचोऽनभिधाने मानम् फलभेदे प्रत्याख्यानासङ्गतेरिति भावः ॥

४ अ ६ । पा १ । सू ६६ ॥

व्यन्निर्देशः ॥ ननु भिन्नाश्रययोरपि दीर्घवृद्ध्योरियायेत्यादौ बाध्यबाधकभावो दृष्ट इत्यत आह

तुल्यकालेति ॥ (कै)

बहुलेति । (कै)

[1]यङोऽचि चेति (पा)

चकारेण ॥

अन्तरङ्ग इति । (कै)

प्राक् प्रवृत्तिकत्वमन्तरङ्गत्वम् । न हि तदाऽपवादप्रवृत्तिरिति भावः ॥

अकित्त्वस्येति । (कै)

[2]उदुपधाद्भावादिकर्मणोरिति (पा)

विहितस्येत्यर्थः । एवञ्चाकित्त्वाभावे

[3]क्ङिति च (पा)

इत्येव निषेधः सिद्धो "निकुचित" इति भावः ॥ सन्निपातः सम्बन्धः । तद्विघात इति

कर्मण्यण् । (पा)

---

१ अ २ । पा ४ । सू ७४ ॥

२ उदुपधाद्भावादिकर्मणोरण्यतरस्याम् । अ १ । पा २ । सू २१ ॥

३ अ १ । पा १ । सू ५ ॥

अजादौ प्रत्यये इति । (कै)

यायायतेः क्त्रिचि यातिरित्यादौ आलोपानापत्ते[1] "वरे" ग्रहणस्य वैयर्थ्याच्च चिन्त्यमेतत् । अस्य समाधानं त्वस्माभिरुक्तमेव ॥ अत एव

[2]न पदान्त- (पा)

सूत्रे "वरे" ग्रहणं चरितार्थम् । सत्यकारे यदि स्याद्यकारलोपस्तदा सम्भव उवङादेरिति भावः ॥

क्ङिति च ॥ १ । १ । ५ ॥

तच्च यदीति । (कै)

[3]तस्मिन्निति- (पा)

परिभाषानुग्रहायेत्यर्थः ॥

यदा त्विति । (कै)

निषेध्यत्वेन तयोः प्राधान्यादिति भावः ॥

---

१ "न पदान्तद्विर्वचनवरे - -" इति सूत्रे ॥ अ १ । पा १ । सू ५८ ॥
२ न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु । अ १ । पा १ । सू ५८ ॥ ३ अ १ । पा १ । सू ६६ ॥

न हीति। (कै)

अनभिनिर्वृत्ते पूर्वपरव्यवहारस्य कर्तुमशक्यत्वात् तदनुपस्थानम्। निर्वृत्तनिषेधे तु "देवदत्तहन्तृहत"न्यायेन चित्तमित्यादाविकः श्रवणं न स्यादिति भावः॥

निमित्तेति। (कै)

अत्र

[1]यस्य च भावेन (पा)

इति सप्तमी। सा च[2] ज्ञापकत्वार्थिका। ज्ञापकत्वं च सम्बन्धं विना-

---

१ यस्य च भावेन भावलक्षणम्। अ २। पा ३ सू ३७॥

२ ज्ञापकत्वार्थिकेति। वस्तुतो "गोषु दुह्यमानासु गत" इत्यत्र गमने गोदोहनसामानकालिकत्वबोधस्य "गोषु दुग्धासु गत" इत्यत्र गोदोहनौत्तरकालिकत्वबोधस्य "गोषु धोक्ष्यमाणासु गत" इत्यत्र गोदोहनपौर्वकालिकत्वबोधस्यानुभवसिद्धत्वाद् ज्ञाप्यत्वार्थकत्वे चोक्तबोधे वैविध्यस्योपपादयितुमशक्यत्वात् सामानकालिकत्वादिकमेव सप्तम्या वाच्यं मन्तव्यम्। ज्ञाप्यज्ञापकभावस्तु सामानकालिकत्वादिबोधे अर्थात् सिद्धो भवतीति सूत्रे निमित्तत्वेन गृहीतः। अत एव कदा गत इति प्रश्नस्य "गोषु दुह्यमानासु" इत्यादेरुत्तरत्वमपि सङ्गच्छते। ज्ञापकत्वार्थकत्वे तु किं ज्ञाप्यं गमनम् एतत्प्रश्नोत्तरत्वं तस्य स्यात्। न चैतत् कोऽप्यभिप्रैति। एवञ्च न निमित्तनिमित्तिभावलाभस्य विवरणोक्तं द्वारमुपपद्यते। राङ्गपरागे स्नायादित्यत्र तु शब्दवृत्त्या सामानकालिकत्वमेव सप्तम्या बोध्यते स्ननिमित्तापेक्षायां प्रत्यासन्नत्वात् उपराग एव तन्निमित्तत्वेन मनसा गृह्यते इत्यन्यत्॥

नुपपन्नं सद् विधिशास्त्रकृतनिमित्तत्वमादाय पर्य्यवस्यति। एवञ्च निमित्ततया क्ङिज्ज्ञाप्ये गुणवृद्धी नेत्यर्थः। तदाह

क्ङिन्निमित्ता हि तयोः प्रवृत्तिरिति ॥ (कै)

केचित्तु "सिद्धसाध्यसमभिहार"न्यायेन निमित्तत्वं फलतीत्याहुः॥ परेतु क्ङितीत्येतद्गुणवृद्धिविशेषणमेव भवनक्रियातद्भावयोरमूर्त्तत्वेन क्ङित्परत्वासम्भवादिक इत्यस्याद्याप्यनुवृत्त्यनुक्तेः। अनुवृत्तावपि तस्य शब्दपरत्वात्। तस्मान्निमित्तग्रहणाभावे क्ङितीति सप्तम्या

[1]तस्मिन्निति निर्दिष्टे पूर्वस्य (पा)

इत्युपस्थित्या क्ङिति अव्यवहिते पूर्वस्य ये गुणवृद्धी प्राप्नुतस्ते नेत्यर्थः॥ [2]"अनुवादे परिभाषा नोपतिष्ठत" इति तु

[3]इको गुणवृद्धी (पा)

[4]अचश्चेति (पा)

सूत्रद्वयविषयमेवेत्युक्तं भाष्ये। तस्य निषेधस्यानुपलम्भाच्च॥ तद्वक्ष्यति भाष्ये

---

१ अ १। पा १। सू ६६॥
२ विधौ परिभाषोपतिष्ठते नानुवादे। परिभाषेन्दुशे-१०२॥
३ अ १। पा १। सू ३॥
४ अ १। पा २। सू २८॥

(अ. १। पा. १ आ. ४) (क्ङिति च १। १। ५)

क्ङित्यनन्तरो गुणभाव्यस्तीति । (भा)

निमित्तग्रहणे तु तत्सामर्थ्यात् परिभाषानुपस्थानं तत्प्रत्याख्याने तु लिङ्गादिना तदनुपस्थानम् । सम्भवन्त्यां परसप्तम्यां

[1]यस्य चेति (पा)

सप्तम्या असम्भवाच्च । [2]"उपपदविभक्तेरिति"न्यायात् ॥ "सिद्धसाध्यसमभिहारन्यायस्या"पि

[3]तस्मिन्निति (पा)

शास्त्रेण बाध एव । अत एव निमित्तग्रहणप्रयोजनावसरे "हत"[4] इत्युदाहरिष्यति ॥ कैयटोक्तरीत्या इक्पदानुवृत्तावेव

[5]निमित्तग्रहणम् इति (भा)

वार्त्तिकस्योक्तिसम्भवेन तत्प्रयोजनदानानुक्तिसम्भवः स्पष्ट एवेत्याशयः ॥

उपधाया अपीति । (कै)

---

१ अ २ । पा ३ । सू ३७ ॥

२ "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति । परिभाषेन्दुशे-१०३ ॥

३ अ १ । पा १ । सू ६६ ॥

४ अत्रैवाग्रिमभाष्ये "इमाणिच भूयस्तन्निमित्तग्रहणस्य प्रयोजनानि । हतो हथ उपोयते औयत लोयमानिः पोयमानिर्ननिक्त इति" ॥

५ "क्ङितिप्रतिषेधे तन्निमित्तग्रहणम्" इति अत्रैव भाष्ये उक्तम् ॥

उपधायां रोरवौतौ चार्थः प्रयोजनं प्रवृत्तिनिवृत्तिभ्यां प्रतिषेधो यस्य तत् तन्निमित्तग्रहणमिति भाष्यार्थ इति भावः ॥ उपधारोरवौतिभ्यामिति

उपधारोरवीत्यर्थमिति (कै)

अर्थेन[1] नित्यसमास इत्यन्ये ॥

नन्वसन्निहितं पुगन्ताङ्गादि कथं तत्परत्वेन विशेष्यमत आह

आकाङ्क्षयेति ॥ (कै)

[2]ननु निषेध्ये गुणवृद्धी प्रति किङित्प्रत्ययपरेगूपं निषेधविषयं प्रति चाकाङ्क्षा नाङ्गं प्रतीत्यत आह

अथवेति । (कै)

निषेध्यगुणादेरप्रत्यये किङित्यप्रसङ्गेन प्रत्ययग्रहणमिति भावः ॥ एवं च प्रत्ययस्याङ्गांशे उत्थिताकाङ्क्षत्वात् तस्यैव तद्विशेषणमिति भावः ॥

आद्यव्याख्यायां परिहारभाष्यं योजयति

ततश्च समुदेति । (कै)

द्वितीयेत्विदं बोध्यम् । नाच्चिन्नविशेषणत्वं न्याय्यमिति । भाष्ये

अङ्गविशेषणे हीति । (भा)

---

१ "अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्" इति वार्त्तिकेन । अ २ । पा १ । सू ३६ ॥

२ किङत्यरे । क । ख । ग । इ ॥

[1]पुगन्तलघूपधस्य (पा)

इत्यस्य बहुव्रीहिणाङ्गविशेषणत्वे इत्यर्थः ॥

[2]यदि (भा)

इत्यनेन न खपचस्योपादेयतोच्यते किन्तूभयोः साम्यमुच्यते इत्याह

तन्निमित्तपक्षस्यापीति। (कै)

सार्वधातुकनिमित्तस्य लघूपधलक्षणस्य तिङ्निमित्तस्य ॥

भाष्ये

अन्तरङ्गलक्षणत्वादिति। (भा)

प्राधान्येनाच एव यत्रानन्तर्य्याश्रयणं तत्रैव[3] "नाजानन्तर्य्ये" इति निषेधप्रवृत्तेस्तस्या अभावाच्चेति भावः ॥

ननु अदुद्रुवद् इत्यत्र

[4]सार्वधातुकेति (पा)

गुणात् पूर्वं नित्यत्वाच् "चङि"

[5]द्विर्वचनेऽचीति (पा)

निषेधादुवङभावे द्वित्वात् परत्वात् लघूपधगुणो दुर्वार इति चेन्न। अन्तरङ्गत्वात् द्वित्वस्यैव प्रवृत्तेः। [6]ओर्णेर्च्छदित्करणेनोपधाकार्य्यस्य

---

१ अ ७। पा ३। सू ८६। २ "यदि तन्निमित्तग्रहणं क्रियते प्रचडन्ते दोषः। रियति पियति धियति प्रादुद्रुवत् प्रासुस्रुवत्" अत्रैव भाष्ये ॥

३ "नाजानन्तर्ये बहिरङ्गप्रकृतिः"। परिभाषेन्दु – ५१ ॥

४ अ ७। पा ३। सू ८४ ॥ ५ अ १। पा १। सू ५९ ॥

६ ओर्णधातोः।

द्वित्वात् प्रावल्यबोधनेऽपि न क्तिः। ज्ञापकस्य सजातीयापेक्षत्वे-नोपधाकार्य्यस्य द्वित्वात् प्रावल्यबोधने यत्र द्वित्वसमाननिमित्तता द्वित्वनिमित्तत्वाग्निमित्तता वा तत्रैव तत्प्रावल्यबोधनादित्याहुः॥

[1]**भूयः** (भा)

पुनरर्थे॥

एवमकारोऽपीति। (कै)

क्ङित्परे गुणवृद्धी न प्रयोक्तव्ये इति सूत्रार्थः॥ तत्र यथा "चितमि"त्यादावसतो गुणादेः प्रागभावः पाल्यते एवं सतोऽपि निवृत्तिः साध्येत। सतोऽपि निवृत्तेः

[2]**अदिप्रभृतिभ्य** (पा)

दित्यादौ दृष्टत्वादिति भावः॥

नन्विति। (कै)

तथाचैक दित्यनुवृत्तिसामर्थ्यादसत एवाप्रयोगः प्रतिपाद्यत इति भावः॥

[3]**नेनिक्ते** (भा)

दित्यत्र

[4]**निजां त्रयाणां गुणः श्नौ** (पा)

---

१ "इमानि च भूयस्त्वनिमित्तग्रहणस्य प्रयोजनानि"। अत्रैवोक्तम्॥

२ अ २। पा ४। सू ७२॥ ३ "हतो हथ उपोयते श्रीयत लूयमानिः पूयमानिः नेनिक्त इति" अत्रैव भाष्ये॥

४ अ ७। पा ४। सू ७५॥

इत्यभ्यासस्य गुणः ॥ [1]प्रसक्तत्वानभिनिर्वृत्तत्वयोर्विरोधमाशङ्क्याह

सामान्येति । (कै)

निवृत्तिः । (कै)

अनभिनिर्वृत्तिः क्रियते ॥ विहितप्रतिषिद्धयोर्विकल्पस्तर्हि स्यादत आह

परमार्थेति । (कै)

गुणविध्येकवाक्यतया क्ङिन्निमार्धधातुकादौ गुण इत्यर्थात् क्ङिति तयोरप्राप्तिरेवेति भावः । सा च पर्य्युदासविधया । यद्वा प्रसज्यप्रतिषेधेन वाक्यार्थबोधे तदंशे सामान्यशास्त्रजज्ञानस्याप्रामाण्यं कल्प्यते । एकवाक्यताफलसम्पत्तेस्त्वेकवाक्यतायामित्युक्तमिति द्रष्टव्यम् ॥

भूताकारेति । (कै)

सिद्धाभावपरिपालनेनैव सिद्धावसिद्धाभावविधाने गौरवादिति भावः ॥

प्रक्रियायामिति । (कै)

वस्तुतस्तु तत्रापि लुकानुत्पत्तिरेवान्वाख्यायते इति बोध्यम् ॥

नैष इति । (कै)

[2]"एकान्ता अनुबन्धा" इति भावः ॥ [3]अयमेव न्याय्य इति

---

१ अत्रैव भाष्ये "प्रसक्तस्यानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्त्तुम्" ॥ २ परिभाषेन्दुशे—५ ॥

३ "वृत्तञ्चो ह्याचार्योऽनुबन्धानासञ्जति । उभयमिदमनुबन्धेषूक्तम् एकान्ता अनेकान्ता इति । किमत्र न्याय्यम् । एकान्ता इत्येव न्याय्यम् । कुत एतत् । अत्र हि हेतुर्व्यपदिष्टः । यच्च नाम सहेतुकं तन्न्याय्यम्" । तस्य लोपः (१। ३। ९।) इत्यत्र भाष्ये ॥

(क्ङिति च । १ । १ । ५) (अ. १ । पा. १ । आ. ४)

[1]तस्य लोप (पा)

इति सूत्रे वक्ष्यति ॥

कार्यित्वादिति । (कै)

अङ्गस्य गुणो भवति तत्सम्बन्ध्यभ्यासेक इत्यर्थ इत्यभिमानः ॥

उत्तरस्त्विति ।

पच इति शेषः । क्ङित्परस्य यस्य गुणः प्राप्तस्तस्य नेति सूत्रार्थ इति भावः ॥ भाष्ये

[2]धातुं क्ङिदिति ।

"परत्वेन" निर्दिष्टं यत् "क्ङिदि"ति त"द्धातुं" प्रति विहितमिति "विशेषयिष्यामः" । तथाच धातुविहितं क्ङिद्यतः कुतश्चित्परं तदवयवस्य गुणो नेति सूत्रार्थ इत्यर्थः ॥ तद् ध्वनयन्नाह

मत्वाप्रश्न इति ॥ (कै)

धातुर्विकरणो वेति । (कै)

धातुना विहितविशेषणबललब्धमेतदुभयम् ॥

येन नेति । (कै)

[3]पुगन्तलघूपधस्येति (पा)

---

१ अ १ । पा ३ । सू ९ ॥

२ "धातुं क्ङित्परत्वेन विशेषयिष्यामः" । भाष्ये ॥

३ अ ७ । पा ३ । सू ८६ ॥

तत्पुरुष इति भावः । श्रुतत्वात्सार्वधातुकादिकं कि्ङतीति च पुगन्तादीनामेव विशेषणमित्यभिमानः ॥

प्रतिषेध्यापेक्षायामिति । (कै)

गुणवृद्धिश्रुत्या तद्रूपप्रतिषेध्याकाङ्क्षायां यावद्गुणवृद्धिविधायकशास्त्रविषयकनिषेधवाक्यानां व्यक्तिपक्षे विनिगमनाविरहादुपप्लव इत्यर्थः ॥

प्रधानानीति । (कै)

अनेन तद्विषयकनिषेधोपप्लवे बीजं दर्शितमित्याहुः ॥

अङ्गविकल्पेति । (कै)

पूर्वस्य परस्य वेति सन्देहेन तदुपस्थितेरिति भावः ॥ न चैवं

नेनिक्ते (भा)

इत्यत्रापि निषेधः स्यात् । [१]"येन नेति"न्यायेनैकवर्णव्यवधाने एव निषेधप्रवृत्तेर्बाधनात् ॥

न्यायव्युत्पादनार्थेति । (कै)

न्यायव्युत्पत्तिस्तत्प्रतिपत्तिः । श्रोतृणां तदुत्पादनायेत्यर्थः ॥ भाष्ये

[२]हलन्ताच्चेति । (भा)

---

१ "येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्" ॥

२ अ १ । पा २ । सू १० ॥

नन्वेतद्विहितकित्त्वस्य न ज्ञापकत्वम् ॥ [1]दिदृक्षतीत्यादावमागमनिषेधेन धिप्सतीत्यादौ नलोपेन च तच्चारितार्थ्यात् ।

[2]इको झल् (पा)

इत्यपि न । तद्विषये इकः क्ङित्यरस्यैव सम्भवादिति चेन्न "सृजिदृशोर्झल्यमकिति" "इको झल्" "दम्भे"रिति लघुन्यासेन सिद्धे सामान्यतोऽतिदेशस्य गुणप्रतिषेधार्थत्वेन ज्ञापकसाम्राज्यात् ॥

[3]रुदविदमुषां (पा)

क्तासनो-

[4]मृडमृदगुधकुषक्लिशां (पा)

कः कित्त्वविधानं च ज्ञापकं बोध्यम् ॥

अङ्गाधिकार इति । (भा)

स्वरितलिङ्गाभङ्गेनेति भावः ॥

[5]कार्य्यकालमिति । (भा)

तथाच तच्चोपस्थितत्वादिदमप्याङ्गमङ्गाधिकारस्थैकवाक्यतापन्नत्वादिति भावः । स्वरितत्वाभङ्गवशात् तदधिकारपठितमिव तद्-

---

१ सर्वपुस्तके परस्मैपदविशिष्टः पाठः तथा नागेशस्वहस्तपुस्तकेऽपीति ग्रन्थकर्त्तुरेव भ्रमः । ज्ञाश्रुस्मृदृशाम् (१ । ३ । ५७ ।) इत्यात्मनेपदस्य व्यवस्थापितत्वाद् "दिदृक्षते" इति पाठः ॥

२ अ १ । पा २ । सू ९ ॥

३ अ १ । पा २ । सू ८ ॥ ४ अ १ । पा २ । सू ७ ॥

५ परिभाषेन्दुशे—३ । कार्यकालं संज्ञापरिभाषम् ॥

धिकारस्यैकवाक्यतापन्नमपि गृह्यते इति तात्पर्य्यम्। निषेधेऽपि परिभाषासादृश्यात् परिभाषात्वमुक्तम्। सादृश्यं च निषेध्याकाङ्क्षतया तदेकवाक्यतामाश्रित्येति बोध्यम्॥

[1]छान्दसमिति। (भा)

[2]यङोऽचि चेति (पा)

चेन

[3]बहुलं छन्दसी- (पा)

त्यनुकृष्य यङो लुग्विधानादित्यर्थः॥ न च

[4]हुझ्वोरिति (पा)

सूत्रस्थेन "झ्वोरि"त्यस्य भाषायां यङ्लुक्सत्ताज्ञापकत्वपरभाष्येणोवर्णान्तेभ्यो यङ्लुग् भाषायामप्यस्तीति लभ्यतेऽन्यथा ज्ञापितेऽप्यचारितार्थं स्यष्टमेवेति वाच्यम्। तत्राभाष्येनाजादौ क्ङिति क्वचित् तत्सत्ताङ्गीकारेऽपि सर्वत्र भाषायां तत्सत्त्वे मानाभावात्। तत्रत्य भाष्यस्यैकदेश्युक्तिलाच्च॥

गुणो बहिरङ्ग इति।

गुणस्य बहिरङ्गता बहिर्भूतसार्वधातुकाश्रयत्वात्। नन्वसिद्धस्थानिष्यन्नस्यैव निषेधः क्रियते तत्राह

असत्त्वादिति। (क्ङि)

---

१ "अथवा छान्दसमेतत्"। भाष्ये॥

२ अ २। पा ४। सू ७४॥ ३ अ २। पा ४। सू ७३॥

४ झ्वोः सार्वधातुके। अ ६। पा ४। सू ८७॥

ग्राम्त्वासिद्धत्वाद्चामत्त्वबुद्ध्या प्रतियोगिज्ञानाभावान्निषेधानुपपत्तिरिति भावः ॥ उभयविशेषणाय

बहुव्रीह्यर्थम् (कै)

[1]इत्यन्वयः ॥

[2]**यथेति ।** (कै)

[3]प्रथमस्येत्येतत्कर्मधारयेऽपि विशेष्यं ग्रक्यं कर्त्तुमिति न तद् बहुव्रीहिगमकमिति भावः ॥ ननु सूत्रान्तरप्राप्तनिवृत्तिः कथं तत्राह

सामर्थ्यादिति । (कै)

अयमाशयः । "आर्द्धधातुक" इति योगो विभज्यते "धातुलोप" इति वर्त्तते षष्ठीतत्पुरुषश्च । एवं च धात्वेकदेशलोपे सति प्रत्यासत्त्यान्तरङ्गतया च लुप्तधात्वेकदेशनिमित्तो गुणवृद्धिनिषेधश्चेत् आर्द्धधातुक एवेति नियमस्तत्सार्थक्यादिति तद्ध्वनयन् आह

यङ्निमित्तश्चेति ॥ (कै)

भाषेति । (कै)

[4]**हुश्नुवोः सार्वधातुके** (पा)

इत्यत्र हुश्नुग्रहणादिति भावः ॥

---

१ इति भावः । क ॥

२ "यथेति" इत्यारभ्य "इति भाव" इत्यन्तं नास्ति । क ॥

३ प्रथमस्येत्येतत्कर्मधारये । ख । ग । इ ॥

४ अ ६ । पा ४ । सू ८७ ॥

(अ. १। पा. १। आ. ४) (क्ङिति च । १। १। ५।)

इत्यादिभ्य इति । (कै)

आदिना ह्रच्छ्मूर्च्छौ ॥

[1]राल्लोप इति । (कै)

तत्र हि क्ङितीति नानुवर्त्तते तदनुवृत्तिपक्षे "तोतोर्मौ"-त्यायुदाहरणम् ॥ नन्वेवमपि "क्ङिति चे"ति निषेधोऽत्र दुर्वार इति तदारणं विनाऽस्य चारितार्थ्यं कथं अत आह

अनेनेति ॥ (कै)

बहिरङ्गराल्लोपस्यान्तरङ्गे यङाश्रयप्रतिषेधे कार्य्यसिद्धुत्वाद् द्वाभ्यां व्यवधानाद्प्राप्तिः । मनः कित्त्वेन तु एक व्यवधानमेवाश्रितमिति भावः । वस्तुतस्तु भाष्यप्रामाण्यादेषां प्रयोगाणां लोकेऽभाव इत्येवाश्रयणीयम् ॥

नन्विग्ल्लक्षणयोरित्युक्तावपि लैगवायने इक् स्थानिकत्वेनेग्ल्लक्षणत्वात् स्यादेव गुणनिषेधोऽत आह

इक इतीति । (कै)

अर्थाधिकारानुरोधेन पदपरमेवेक इति सम्बध्यत इति भावः॥

लोपादिति । (कै)

उपदेशकाल एवान्तरङ्गत्वाल्लोपप्रवृत्तिरिति भावः ॥

पिद् ङिद् नेति । (कै)

[2]सार्वधातुकम् (पा)

---

१ अ ६ । पा ४ । सू २१ ॥

२ सार्वधातुकमपित् । अ १ । पा २ । सू ४ ॥

इत्यत्र "अपिदिति" योगविभागेन प्रसज्य प्रतिषेधेनायमर्थो लभ्यते। तत्र योगविभागसामर्थ्यात् स्थानिवत्त्वप्राप्तान्या वा ङित्त्वप्राप्तिः सर्वापि प्रतिषिध्यत इत्याशयः ॥ भाष्ये

स्थानिवद्भावः प्राप्नोतीति । (भा)

तथा च

अचिनवम् (भा)

इत्यादौ गुणप्रतिषेधप्रसङ्ग इति भावः ॥

ननु ङित इति । (कै)

तथा च न स्थानिवत्त्वेन ङित्त्वं प्रार्थ्यमिति भावः ॥

ङिद् व्यपदेश इति । (कै)

स्थानिसंबन्धिङस्येत्संज्ञाऽभाव एव ज्ञाप्यते ॥

[1]लस्य (पा)

इत्यस्य लघटितस्येति व्याख्या कार्य्येत्यर्थः ॥

यत्कार्य्यं पूर्वस्येति । (कै)

प्राप्तमिति शेषः ॥

नत्विति । (कै)

प्रथमोपस्थितेत्संज्ञाशास्त्रबाधापेक्षया स्थानिवत्त्वबाध एव युक्त इति भावः ॥

युक्त्यन्तरमप्याह

---

१ अ ३। पा ४। सू ७७ ॥

अन्यथेति । (कै)

लङ्लिङादेर्ङित्त्वव्यपदेशस्योच्छिन्नत्वादित्यर्थः । ङित आदेशस्येत्यर्थस्तु नेत्युक्तमेव ॥

तदभावस्यैवेति । (कै)

ज्ञापकस्य सजातीयापेक्षत्वादिति भावः ॥ भाष्ये

[1]यासुट एव (भा)

इत्यस्य न समुदायस्येत्यर्थः । एवस्यावधारणार्थत्वात् । यदि समुदायस्य ङित्त्वं स्यात् तदा ङितो यत्कार्यं तदपि तत् प्राप्नियोग्यमिति तदभावमपि ज्ञापयेत् ॥ तथा

[2]नित्यं ङित (पा)

इत्यादेर्ङित आदेशस्येत्येवार्थः । पचावः पचन्तीत्यादौ तु न दोषः।

[3]सार्वधातुकमपित् (पा)

इत्यचानुवृत्तङिदित्यस्य लुप्तसप्तमीकतया ङितीव कार्यस्येवातिदेशादिति भावः ॥ न च यासुटि ङिति किं कार्यं प्राप्नोति तन्निमित्तग्रहणेन निषेधाप्राप्तेरिति वाच्यम् । संप्रसारणप्राप्तेः । न हि तच्च प्रत्यय इत्यस्तीत्याहुः ॥ नन्ववयवे कृतस्य लिङ्गस्य समुदायविशेषकत्वाद्यासुड् ङिदित्युक्तावपि समुदायस्य ङित्त्वं भवत्येव । अत एव तन्निमित्तग्रहणेऽपि निषेधः सिद्ध्यति तच्च स्थानिवत्त्वेन

---

१ यासुट एव ङिद्वचनात् । भा ॥

२ अ ३ । पा ४ । सू ९९ ॥

३ अ १ । पा २ । सू ४

मिङ्डुमिति व्यर्थं ङित्त्वं स्थानिनो ङिद्व्यपदेशोच्छेदेऽपि ज्ञापकं स्याद् ङितो यत्कार्यं तदभावस्यापि वा ज्ञापकं स्याद् अत आह भाष्ये

अपर्य्याप्तश्चेति । (भा)

अस्य ङित्वस्य केवले आगमे संप्रसारणविधानेन चरितार्थत्वादवयवेऽचरितार्थस्यैव च समुदायविशेषकत्वमत एव पठिता विद्येत्यादौ ङीप्नेति भावः ॥

ङितं चैनम् इति (भा)

अवयवमित्यर्थः ॥

यासुट एव हीति । (कै)

यासुड् ङिदिति सामानाधिकरण्याद् यासुट् पदस्य स्वविधानाय स्वरूपपरस्य ङित्त्वसंबन्धे तदादिलक्षणायां मानाभाव इति भावः ॥

प्रत्याख्यातत्वादिति । (कै)

स्वरितत्वप्रतिज्ञानात्समुदायगतनिमित्तत्वस्यावयवे आरोपादपि निषेधप्रवृत्तिरित्यन्ये ॥

यदि च समुदाय इति । (कै)

ननु स्थानिवत्त्वेन ङित्वे यासुटः कथं ङित्वमिति चेन्न । तद् ङित्वमाश्रयफलस्य तावतापि सिद्धेरिति भावः ॥

केषां चिदिति । (कै)

अत्र पाठे "यासुट एव" इत्येवकारः प्रमिद्ध्यर्थकः । केवलयासुटो ङित्त्वं व्यर्थं गुणनिषेधे तन्निमित्तग्रहणात् । संप्रसारणमपि

(किङति च । १ । १ । ५ ।) (अ. १ पा. १ । आ. ४)

धात्वाचिप्ते प्रत्यये एव । एवं च सामर्थ्यात् समुदायविशेषकं तदिति भावः ॥

ङिन्नच्चैलमिति । (कै)

स्थानिवत्त्वेन ङित्त्वे सिद्धेऽपीति शेषः ॥

ङितो यत्कार्य्यम् (भा)

इत्यादि ज्ञापकस्य सजातीयापेक्षत्वादिति भावः ॥ न हि यासुड् विशिष्टस्य ङित्त्वप्रयुक्तं किञ्चिदनेन ङित्त्वेन प्राप्नोति ॥

[1]नित्यं ङित (पा)

इत्यस्य च ङितो लसेत्येवार्थात् । आदेशस्य ङित इत्यर्थे तु दोष उक्त एव ।

[2]सार्वधातुकम् (पा)

इत्यादौ ङिदित्यस्य उपमेये प्रथमाद्यर्थेनेन सप्तम्यन्तताया अन्याय्यत्वादिति भावः । नन्विदं ङित्त्वं "सुयादि"त्यादावनिग्लक्षणगुणवृद्धिबाधनार्थं "चिनुयुरि"त्यादौ

[3]जुसि चेति (पा)

निषेधार्थं च चरितार्थमिति चेन्न । "ङिच्च पिन्नेति" भाष्योक्तकल्पनयैव सिद्धेः । एतदर्थमेव हि भाष्ये तत्स्वीकारः । यत्तु संज्ञा-

---

१ अ ३ । पा ४ । सू ९९ ॥

२ अ १ । पा २ । सू ४ ॥

३ अ ७ । पा ३ । सू ८२ ॥

पूर्वकविधेरनित्यत्वेन वृद्धेर्वारणम् । अत एवोत औदिति नासुचीति । तन्न । अस्यार्थस्य भाष्यास्पृष्टत्वात् ।

[1]ङ्ङाजनोर्जा (पा)

इत्यस्याङ्गवृत्तपरिभाषाज्ञापकत्वपरभाष्यामङ्गतेश्च । अनयैवान्यथा सिद्धेः ।

जुसि च (पा)

इत्यत्र

[2]क्ङिस्याचि (पा)

इत्यतोऽचीत्यनुवर्त्याजादौ "जुसि" गुणविधानान्न "चिलुयुरि"-त्यत्र दोषः । एवं चात्रत्यपूर्वपक्षसिद्धान्तावेकदेशिन एवेति बोध्यम् ॥

दीधीवेवीटाम् । १। १। ६ ॥

भाषायामिति । (कै)

अनन्यभावो हि विषयशब्दार्थ इति भावः ॥

दृष्टस्यैवेति । (कै)

भाषायान्तु सम्प्रति प्रयोगेऽदृष्टस्यापि व्याकरणान्तरानुसारेण शिष्टप्रयोगादिना वावगतसाधुत्वस्याप्यनुविधानमित्यर्थः । एवं च

---

१ अ ७ । पा ३ । सू ७९ ॥ २ अ ७ । पा ३ । सू ७२ ॥

वेदे "आदीध्यनम्" इत्यादिलक्ष्याभावादसम्भवदुक्तिकं सूत्रमिति भावः ॥

अथवेति । (कै)

एवं च लक्षणस्याव्याप्तिप्रतिपादकं भाष्यमिति भावः ॥

व्यत्ययेनेति । (कै)

दीधीङो ङित्त्वात् ॥ परस्मैपदोपलक्षणं

तिबिति ॥ (कै)

अन्तरङ्गत्वादिति । (कै)

नन्वेवं बहिरङ्गस्य "जुसि" गुणस्य कथमनेन निषेध इति चेन्न सर्व्वस्यापि गुणस्य प्रत्ययाश्रयत्वेन बहिरङ्गतयान्तरङ्गनिषेध्याभावादिति भावः ॥

सर्वचैतन्न्यायानाश्रयणे हेतुमाह

कार्य्यविशेषेति । (कै)

यच्छब्देन तत्तद्रूपेण कार्य्याणां परामर्शादिति भावः। केचित्तु सामान्यचिन्ताविषयेऽयेतं न्यायं योजयन्ति तदा "येनेत्यस्य" स्वेतरेणेत्यर्थः ॥ भाष्ये

अकणिषमिति । (भा)

सिजन्तस्याङ्गस्य मिपोऽमि लघूपधगुणः प्राप्नोति ॥

स्वः (भा)

प्रयोगो लुडर्थः। तत्र हि तिपो डादेशे टिलोपे च ताम् प्रत्ययान्तमङ्गं भवति । क्वचि च्लेरङ्गत्वान्न गुण प्राप्तिरिति भावः ॥ भाष्ये

पुनरिड्ग्रहणस्येति। (भा)

न च नेत्यस्यनिवृत्त्यर्थं तत् सार्वत्रिकेदं

[1]नेड्वशी- (पा)

त्यत्र भाष्ये इति वाच्यम्। "क्वचिदेकदेशोऽप्यनुवर्त्तते" इति न्यायेन

[2]नेड्वशी- (पा)

त्यत्र नञो निवृत्तिसिद्धेरिति भावः॥ वस्तुतस्तु अत्रत्यमिदं भाष्यमेकदेश्युक्तिः॥

[3]आर्द्धधातुकस्य (पा)

इति सूत्रस्थेड्ग्रहणस्य च

[4]नेड्वशी- (पा)

तिसूत्रे भाष्ये प्रत्याख्यानात्। तत्करणेन नियमरूपगुरुतरयत्नमाश्रित्यैतत्प्रत्याख्यानस्यायुक्तत्वात्। अङ्गस्येत्यनुवृत्तावपि अङ्गाधिकारविहितविकारस्यैव व्यावृत्तेः शब्दमर्य्यादयालाभाच्च। अन्तेऽपि सिद्धत्ववचनस्य ज्ञापकत्वाश्रयणे गौरवमिति बोध्यम्॥

क्विबिति। (कै)

अप्रत्यय (भा)

इत्यस्याश्रूयमाणः प्रत्यय इत्यर्थः। इदन्तत्वात् प्रातिपदिकत्वे स्वादयः॥

झलन्तत्वाभावादिति। (कै)

---

१. २. ४. नेड्वशि कृति। अ ७। पा २। सू ८॥

३ आर्द्धधातुकस्येड्वलादेः। अ ७। पा २। सू ३५॥

स्विधौ स्थानिवत्त्वाभावादजन्तलक्षणोऽपि नेति द्रष्टव्यम्॥ ननु क्वौ लुप्तस्य स्थानिवत्त्वनिषेधाद्लोपस्य स्थानिवत्त्वं दुर्लभमत आह

क्वाविति॥ (कै)

अलावीदित्यचेति। (कै)

न च समार्त्तीत्यच

[1]ह्रस्वादङ्गात् (पा)

इति "सिज्" लोपाय सिद्धत्ववचनं चरितार्थं सिद्धत्वेहि परत्वात् सिज्लोपे ततो वृद्धिरन्यथा पूर्वं वृद्धौ स ञ स्यादिति वाच्यम्।

लावस्थायामडिति (भा)

पक्षे सर्व्वतो वृद्धेरन्तरङ्गत्वेन तत्पक्षे सिज्लोपाप्राप्त्या तदेकवाक्यत्वेन पक्षान्तरेऽपि सिजलोपाभावस्यैवौचित्येन "समार्ष्टे"-त्येवरूपस्यौचित्यात्। सत्यभिधाने।

[2]सिज् लोप एकादेश (वा)

इति तु सिजलोपोत्तरप्राप्तसवर्णदीर्घरूपैकादेशविषयमेवेति बोध्यम्। वस्तुतो नियमस्यैकदेशयुक्तित्वाद्विफलोऽयं विचार इति तत्त्वम्॥

---

१ अ ८। पा २। सू २७॥

२ स्वरितो वानुदात्ते पदादौ (अ ८। पा २। सू ६) एतत्सूत्रस्य-वार्त्तिकम्। सिद्धान्तकौमुद्यान्तु "इट ईटि" (अ ८। पा २। सू २८) इति सूत्रे पठितम्॥

हलोऽनन्तराः संयोगः । १। १। ७॥



अन्तराशब्दो मध्ये इत्यर्थे ॥

न त्वाधारस्येति । (कै)

कालमात्रस्येत्यर्थः ॥

अर्द्धेति । (कै)

वर्णादूर्णोच्चारणेऽर्द्धमात्राकालस्य नियतत्वात् तदधिकोऽर्द्धमात्राकाल इत्यर्थः । अत एव "मात्राकालोऽवग्रह" इति प्रातिशाख्यान्तरैरविरोधः ।

नैव दोष (भा)

इत्यादेः संज्ञाभावे न दोषः । संज्ञायां च न प्रयोजनमित्यर्थ इत्याह

दोषनिवृत्तये (कै)

इत्यादि ॥

अप्सव्यशब्द इति । (कै)

अप्शब्दाद्

[1]दिगादि (पा)

यति

---

१ दिगादिभ्यो यत् । अ ४ । पा ३ । सू ५४ ॥

(अ. १। पा. १। आ. ४) (हलोऽनन्तराः संयोगः। १। १। ७।)

[1]अपो योनियन्मतुषु (वा)

इत्यलुक् ॥

प्रकृत्यवयवस्य। (कै)

तद्धितप्रकृत्यवयवस्य। अत्र च वैदिकसम्प्रदाय एव शरणम् ॥

अन्त इति। (कै)

समासे समस्यमानपदान्त एवावग्रहः। अयमपि वैदिकसम्प्रदाय एव ॥

नन्वनन्तरग्रहणादेकैकस्य संज्ञा दुर्लभेत्यत आह

आनन्तर्येति। (कै)

एवं च तदुपलक्षणमिति भावः ॥ "संज्ञाप्रतिबन्धे"तिपाठे कर्मणि "घञ्" बोध्यः ॥

संज्ञाप्रतिबन्धेति (कै)

पाठः सुगम एव ॥

कस्मादिति। (कै)

बह्वनां सन्निधानेऽविशेषेण द्वयोर्बह्वनां च संज्ञायाः सिद्धान्तयिष्यमाणत्वादिति भावः ॥ परिहरति

एत्वे इति। (कै)

"पूर्वत्रासिद्धीयमद्विर्वचने" इति तु द्विर्वचने कार्येऽन्यस्यासिद्धत्वं नेत्यर्थकं न तु द्विर्वचनस्य तदभावप्रतिपादकमिति भावः ॥

---

१ अलुगुत्तरपदे (अ ६। पा ३। सू १) एतत्सूत्रस्यवार्त्तिकम्॥ यन्मतुष्विति। अयं पाठो हरदत्तानुसारेण। "मतिषु" इति युक्तः पाठः। एकवच इत्यस्यातिप्रसङ्गव्याजेनाप्सु चरादिवदस्य भाष्ये उपन्यासात्। नहि अप्सुमन्ताविवत्यत्र तस्य प्रसङ्गोऽस्तिअप्शब्दपरतया तस्यैकत्वमात्रार्थत्वात्। किन्तु मतुष्विति पाठे फलं चिन्त्यम्। अस्य वामीयमित्यादाविव लुकोऽप्राप्तेः॥

संयोगो भवत्यादिश्चेति । (कै)

प्रत्येकं संज्ञापक्षे स्कोः संयोगावयवत्वासंभवेन षष्ठीसमासासम्भवाल्लाघवाच्च कर्मधारय एवेति भावः। आदिग्रब्दश्च पूर्वभूतसमीपवाची आदित्वं च प्रत्यासत्त्या संयोगत्वाक्रान्तवर्णान्तरापेक्षयैवेति पदान्तांशे संयोगादिग्रहणचारितार्थ्यं बोध्यम्। अन्यथा हि अर्कयतेरप्रत्ययेऽर्क् इत्यादावन्त्यकस्यापि लोपः स्यात् ॥

कथं वृत्ताविति । (कै)

अयं पूर्वपक्षोऽयुक्तः । संयोगस्य द्वित्ववत्त्वेन प्रतीतेरेवाभावात् । संयोगत्वेनैवानेकसंयोगप्रतीतेः । न हि वृत्तावनेकबोध उपसर्जनान्नेति भाष्यमस्मृतं संख्याविशेषानवगमस्यैव भाष्यकृतोक्तत्वात् । नत्वनेकानवगम इति तेनोक्तमिति विभाव्यताम् ॥

संयोगात्पर इति । (कै)

न चाङ्गाद्यवयवसंयोगग्रहणायादिग्रहणम् । तच्च यद्यपि दरिद्रातौ न फलम् । आर्द्धधातुकविवक्षायां तस्याऽऽक्लोपविधानात् । तथापि खट्वादिभ्य आचारक्विबन्तेभ्यो लिङि खट्वायादित्यादौ एत्ववारणं फलमिति वाच्यम् ।

[1]स्यसिच् (पा)

सूत्रादुपदेशपदानुवृत्त्या "घुमास्था"द्यन्यस्यौपदेशिकस्यैव ग्रहणेन नामधातुष्वेलाप्रवृत्तेरिति भावः ॥ खट्वादिभ्य

---

१ स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ॥ अ ६ । पा ४ । सू ६२ ॥

(अ. १। पा. १। आ. ४) (हलोऽनन्तराः संयोगः। १। १। ७।)

[1]आतो धातो- (पा)

रितिसूत्रस्थभाष्यप्रामाण्येनाचारक्विपोऽभावाच्च। सिद्धान्ते तु "निर्या-यादि"त्यादि वारणायाङ्गावयवसंयोगग्रहणाय तदिति बोध्यम्॥ भाष्ये

आदी इति। (भा)

यद्यपि मुख्यादित्वमुभयोर्व्याहतं तथाप्येक आदिशब्दो गौण इति भावः। पूर्ववद् द्विवचनान्तसमासेन दोषपरिहार इति न भाष्यार्थ उभयत्रापि द्विवचनोपपादनादत आह

षष्ठीति। (कै)

एवं च झलंशेऽपि संयोगादिविशेषणमर्थवद्भवतीति भावः॥ आदिशब्दस्य नाद्यवयववाची असम्भवादित्याह

समीप इति। (कै)

झलादिविशेष्यस्य संयोगस्योपसर्जनत्वेऽपि सौत्रत्वाद्वृत्तिः। न च

शङ्का (भा)

दत्यत्र व्यपदेशिवद्भावेन स्वस्यापि स्वसमीपत्वेन दोषस्तदवस्थः। आदिग्रहणसामर्थ्याद्व्यपदेशिवद्भावाप्रवृत्तेः॥ वस्तुतस्तु "प्रत्येकं संज्ञेति" पक्षो वाच्यवृत्त्या सूत्राल्न लभ्यत एवेति व्युत्पादयितुं गूढाशयः पृच्छति भाष्ये

---

१ अ ६। पा ४। सू १४०॥

कथं क्त्वेति ॥ (भा)

तमेवालाभं व्याचष्टे

संयोगेति । (कै)

एवं चान्वर्थसंज्ञाविरोधात्

[1]प्रत्येकं वाक्यपरिसमाप्ति- (भा)

न्यायो नाश्रयितुं शक्यते इति व्यर्थं

सहेती- (कै)

ति भावः । किं च श्रुतमानन्त्यं प्रत्येकसंज्ञावादिनोपलक्षणमाश्रयितव्यं विशेषणत्वमेवोचितम् । "तत्त्वे सम्भवति उपलक्षणत्वस्यान्याय्यत्वात्" । किं च आद्यन्तग्रहणसामर्थ्याद् द्विवचनान्तेनैव विग्रह इत्यर्थस्य नियमेनालाभः । बहुवचनान्तेनापि सम्भवादित्याहुः ॥ वस्तुतोऽन्वर्थसंज्ञा चिन्त्या । तदाश्रयणे घटपटौ संयुज्येते यत्रेत्यादौ संयोगानुयोगिप्रतियोग्यतिरिक्तस्यैवान्यपदार्थतया प्रतीतेर्व्युत्पन्नत्वेन तद्व्यतिरिक्ततद्घटितपदवाक्यरूपसमुदायस्य संज्ञापत्त्यावनिष्टापत्तेः । तस्मान्महासंज्ञाकरणं प्राचामनुरोधेनेत्येव ज्यायः । अत एव भगवता "गर्गदण्डन"न्यायमाश्रित्य महद्ग्रहणं प्रत्याख्यातं न तु महासंज्ञया इत्यलम् ॥

ननु

अविशेषेण (भा)

---

१ "प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति । तद्यथा । वृद्धिगुणसंज्ञे प्रत्येकं भवतः" ॥ इत्यत्रैव भाष्ये ॥

(अ. १। पा. १। आ. ४) (हलोऽनन्तराः संयोगः। १। १। ७।)

इत्यस्य द्वयोर्बह्वनां चेति नार्थोऽस्माविशेषस्याग्रे वक्ष्यमाणत्वान्मम्जौ दोषदानायङ्गतेश्चात आह

द्वयोरित्यस्येति ॥ (कै)

अत एव भाष्ये

[1]समुदाये संयोगादिलोप (भा)

इति वक्ष्यति। तत्र युक्तिमाह

यथेति (भा)

भाष्ये॥ "पूर्वं धातुरूपमर्गेण"त्याश्रित्य क्वचित्। क्वचिच्च वाक्यसंस्कार-पक्षाश्रयेण दोषोपन्यासः॥

हल इति जातावितिः। (कै)

वस्तुतो हलौ च हलश्चेत्येकशेषः।

[2]स्वरितात् (पा)

इति सूत्रे "अनुदात्तानाम्" इत्यत्र भाष्ये तथैव वक्ष्यमाणत्वात्॥

परे अनन्तरा इतिः। (कै)

[3]तस्मादित्युत्तरस्य (पा)

इत्युपस्थितेरिति भावः॥ "चन्द्रीयतेः" सनोऽभिधाने "यथेष्टं नामधातुषु" इति द्वितीयैकाचो द्वित्वं नकारसहितस्यैव। आद्यवयवाचः परत्वाभावेनैतन्निषेधाप्रवृत्तेरिति बोध्यम्॥

---

१ कश्चात्र विशेषः। समुदाये संयोगादिलोपो मस्जेः। समुदाये संयोगादिलोपो मस्जेर्न सिद्धति। अत्रैव भाष्ये॥

२ स्वरितात्संहितायामनुदात्तानाम्। अ १। पा २। ३९॥

३ अ १। पा १। सू ६७॥

बह्वनां चाविवरत्वे इति। (कै)

"बह्वनां चानन्तरत्वे" इति क्वचित् पाठः॥ नन्वत्र विग्रहे कमित्यादौ कमयोः संयोगसंज्ञा स्यात् तयोर्मध्ये वर्णशून्यच्छिद्राभावादिति चेन्न। वर्णशून्यकालव्यवायमात्रवारणे फलाभावात् सामर्थ्येन सवर्णकालव्यवायोऽपि व्यावर्त्यत इत्यदोषः॥

द्विर्वचनवदिति। (कै)

एषाम् इति (भा)

बहुवचनादिति न भ्रमितव्यम्।

[1]तस्य

सूत्रे "हल" इतिवत् सत्त्वात्। "अन्तरा"शब्देन विग्रहेऽपि तत् सत्त्वाच्च॥ अन्यथा द्वयोर्नस्यात् किन्त्वन्तरशब्देन विग्रहाद्बह्वनां समवधाने तेषामप्यनन्तरत्वादिति भावः। संसर्गविप्रयोगावेव भाष्ये दर्शयति

द्वयोश्चैवेति। (भा)

विद्यते (भा)

इत्यन्तं दृष्टान्तार्थम्॥ "अवत्सा धेनुरि"त्यादौ विप्रयोगोऽपि विशेषावगतिहेतुर्दृष्टः॥ "अन्तराविद्यत" इति "न विद्यत" इति वा यत् तद् द्वयोरेवेत्यर्थः॥

नियताऽवधिरुपतेति। (कै)

---

१ अ१। पा३। सू९॥

अवधित्वं हि अन्यासहितत्वे एव तयोर्नियमेन भवति। अन्यसाहित्ये तु न तत्रावधित्वस्य नियमेन प्रतीतिरवधित्वविवक्षायामेव च द्वितीयेति भावः । यस्य च नियमेनावधित्वं तस्यैवावधित्वविवक्षा शब्देनेति तात्पर्यम् ॥ नियतत्वमन्यासहितत्वं तद्वैशिष्ट्येन याऽवधिरूपता सा विवक्षिता यदा भवतीत्यक्षरार्थः । अन्यथा अवधित्वविवक्षायां द्वितीया तत्त्वाविवक्षायां षष्ठीत्यर्थस्यैव शब्दतो लाभेन

नियतेति (कै)

कथनमधिकं स्यादिति बोध्यम् ॥

युक्तग्रहणादिति । (कै)

न च तदभावे "अन्तरान्तरेण" शब्दाभ्यां द्वितीयापत्तिः । तयोरव्ययत्वेन विशेषाभावात्। न च प्रथमाबाधनेन

[1]सपूर्व्वायाः प्रथमायाः (पा)

इत्यस्याप्रवृत्त्यर्थम् । व्यवस्थितविभाषया तस्य सुपरिहरत्वात् ॥ तस्माद्

युक्त- (कै)

ग्रहणं सम्बन्धविशेषस्य प्रतिपादनाय अवधित्वस्य प्रतियोगित्वस्य वा। तेन प्रयोगमन्तरेणेत्यपि सिद्धम् । एवं च सम्बन्धमात्र विवक्षाया षष्ठ्येवेति भावः ॥ ननु भाष्ये

द्वयोरिति (भा)

षष्ठीद्विवचननिर्दिष्टस्य द्वित्वाद्

---

१ अ८। पा१। सू२१ ॥

यान् हीति (भा)

बहुवचननिर्देशोऽनुपपन्न इति चेन्न। प्रकृते "द्वयोरि"त्यनेन न केवलौ वर्णौ निर्दिष्टौ तथा सति तयोरेवावधित्वे द्वितीयापत्तिः। किन्त्वन्यसहितावपि। अत एव षष्ठी। एवं च त्रयाणां समवधाने द्वयोः समुदाययोरवधित्वविवक्षणेन द्वयोः समुदाययोरनन्तरत्वे तत्समुदायवर्त्तिहलां बहुत्वात् तदुपपत्तिः।

अनन्तरा (कै)

इत्यनेन च न विद्यतेऽन्तरा यौ वर्णौ तौ यौ च समुदायावन्तरा न विद्येते तौ च गृह्यन्ते एकशेषादिति न दोषस्तत्सर्वमभिप्रेत्याह

यदा द्वयोरिति। (कै)

द्वयवयवकसमुदाययोरित्यर्थः॥

यान् (भा)

वर्णान् द्वयोः समुदाययोरित्यर्थक-

षष्ठ्या प्रतिनिर्दिश्यतीति- (भा)

भाष्यार्थ इति भावः॥

अनन्तरा (कै)

इत्यस्याच पक्षे व्यावर्त्यं दर्शयन् पूर्वोक्तमेवार्थं दृष्टान्तेनोपपादयितुमाह

[1]यदा हि बह्वनामिति। (कै)

---

१ यदा बह्वनामिति। ख॥

न च स्रष्टेत्यादौ रेफसकारयोर्वर्णयोरन्तरा कस्यचित्सत्त्वेऽपि सरौ रषौ चेतिसमुदायौ तयोश्चान्तरा न कश्चिदिति तेषां संयोगत्वं स्यादिति वाच्यम्। वर्णयोरन्तरा विद्यमानत्वेनानन्तरत्वाभावात्। सर्वविधानन्तरत्वस्यैव[1] तन्निमित्तत्वादित्याशयः॥

[2]**अनुषङ्गो** (कै)

नकारस्तल्लोपः

[3]**अनिदिताम्** (पा)

इत्यनेन॥

[4]**बह्वनामपीति** (कै)

न्यायतः सूत्रात् समुदायमात्रेणेदमुक्तम्। न तु फलोदाहरणमस्य न्याय्यमस्ति। ध्वनितं चेदम्

[5]**अङ्गेन संयोगादिम्** (भा)

इति ग्रन्थेन भाष्ये॥ ननु द्विर्वचनन्यायेन समुदायस्यैव संज्ञा स्यादिति कथमेतत्पक्षोत्थानमत आह

कार्येति। (कै)

द्विर्वचनं हि श्रवणार्थमेव न शास्त्रीयकार्यार्थम्। एकस्याचो

---

१ निमित्तत्वादित्याशयः। क। ख। ग। इ॥

२ "तच्चानुषङ्गलोपार्थमवश्यं वक्तव्यम्" इति कैयटे॥

३ अ ६। पा ४। सू २४॥

४ "बह्वच्यनन्तरेषु द्वयोर्द्वयोरपि भवति बह्वनामपीत्ययमिदानीमविशेषः" इति कैयटे॥

५ "अङ्गेन संयोगादिं विशेषयिष्यामः" इति वक्ष्यत्यत्रैव॥

(हलोऽनन्तराः संयोगः । १। १। ७।) (अ. १। पा. १। आ. ४)

बह्ववयवत्वं युगपद्ग्रहणं च । एकेन द्वित्वेन सर्वानुग्रहस्येति वैषम्यम् ॥

ननु पदान्तरेण व्यवधानादासत्त्यभाव इत्यत आह

[1]पाठेति । (कै)

शब्दस्यार्थप्रत्यायनाङ्गत्वेन गुणत्वात् तदीयः क्रम आर्थक्रमविरोधे दुर्बल इति भावः ॥

पदधात्ववयवेति । (कै)

[2]संयोगादे- (पा)

रित्यादावाद्यन्तशब्दयोरवयववाचितयेति भावः ॥ अयमाशयः । अङ्गादेरादावन्ते वा व्यञ्जनत्रयाभावात् त्रयाणां फलाभावात् संज्ञाऽप्राप्तौ कथं द्वयोर्न स्यादिति । यद्यपि सामानाधिकरण्यान्वयेऽपि अङ्गाद्यवयवस्यैव संयोगस्याश्रयणं नान्यस्येति

अङ्गेन संयोगादिं विशेषयिष्याम (भा)

इत्यनुपपन्नं तथापि संयोगरूपमादिमङ्गेन परिच्छेत्स्यामः ॥ अङ्गाद्यवयवसंयोगस्यैव बह्वक्षरीहिणाऽऽश्रयणमित्यर्थ इति न दोषः । एवं च "बह्वनामपी"त्याश्रयणे फलाभाव इति स्पष्टमेवोक्तम् । क्लिष्टकल्पनया [3]तादृशसंयोगानयनन्तु न । अनभिधानादित्याशयः । अदादिषु

---

१ "पाठक्रमादर्थक्रमो बलीयान्" ॥

२ संयोगादेरातो धातोर्यण्वतः । अ८। पा २। सू ४३ ॥

३ 'ख' पुस्तके "न" इति नास्ति तत्त्वमुद्रम् ॥

"षस स्वप्ने" इत्येव पाठो न तु "षस, मस्जि स्वप्न" इति ॥ एतद्भाष्यप्रामाण्याद्

[1]अक्षित्यादि-

सूत्रस्थभाष्यप्रामाण्याच्चेति बोध्यम् ॥

व्याख्यानान्तरमिति । (कै)

पाठक्रमाबाधायैवं व्याचक्षते

न प्राप्नोतीति (भा)

अत्र इति शब्दो यस्मादर्थ उत्तरान्वयी यस्मादङ्गेन संयोगादिर्विशेष्यतेऽङ्गावयवः संयोगो गृह्यते इत्यर्थः। एवं च बहूनामेव संयोगत्वे यः संयोगो नासावङ्गावयवो यश्चाङ्गावयवो नासौ संयोगस्तस्माद्

एवं न प्राप्नोतीति (भा)

यदपि तदप्यसत् ॥ यतोऽविशेषेण संज्ञोच्यते इति शेष इति तत् क्लिष्टं शेषपूरणात् । इतेः स्वरसतो वाक्यसमाप्त्यर्थतायाः प्रतीयमानत्वाच्च ।

एवं तावत् सर्वमाङ्गं परिहृतम् (भा)

इत्यस्यास्वारस्याच्च ॥

हल इतीति । (कै)

तद्धि असावित्यादौ

---

१ अ ६। पा १। सु ६ ॥

[1]स्कोरिति (पा)

सलोपवारणायावश्यकमिति भावः ॥

नचेति । (कै)

आनन्तर्यस्य सप्रतियोगिकत्वादिति भावः ॥ प्रकृते चान्यस्य प्रतियोगिनोऽनुपादानादुपस्थितो हलेव प्रतियोगित्वेनाश्रीयत इति बोध्यम् ॥ भाष्ये

[2]उवोषेति (भा)

प्रसङ्गोच्चारितम् । तस्य विकल्पितामकत्वात् । 'उवोखेति' कवर्ग-द्वितीयान्तो वा पाठः ॥

[3]इयायेति । (कै)

दण् ल् इत्यस्यामवस्थायां व्यपदेशिवद्भावादिजादित्वमस्ति गुरु-मत्त्वन्तु न । नचेयङि कृते गुरुमदिजादित्वादाम् स्यादिति वाच्यम् । लिङ् धातुसन्नियोगेन संपन्नस्य गुरुमदिजादित्वस्य तद्वि-घातकत्वाभावादिति भावः ॥

[4]कुलम् (कै)

अत्र गृहम् ॥

---

१ अ८ । पा २ । सू २९ ॥

२ "इयेष उवोष इजादेश्च गुरुमतोऽनृच्छ इत्याम् प्रसज्येत" इति भाष्ये ॥

३ "गुरुमद्वचनम् इयाय इत्यादिनिवृत्त्यर्थं स्यात्" इति कैयटे ॥

४ "एवं कश्चित् पृच्छति । अनन्तरे ऋते ब्राह्मणकुले इति । स आह नानन्तरे ऋषलकुलमनयोरन्तरेति" इति भाष्ये ॥

ब्राह्मणकुलमपीति। (कै)

तत्तद्रूपेण ग्रहणे तस्यापि विजातीयत्वादिति भावः॥ भाष्ये

अनयोरन्तरेति (भा)

षष्ठ्युपादानादन्यसहितयोरवधित्वसूचनात् [१]तत्तद्रूपेणाग्रहणबोधनाद् ब्राह्मणकुलस्याव्यवधायकत्वमेवेत्यन्ये॥

भिन्नजातीयेति। (कै)

[२]तयोश्चान्तरा नद्यश्च पर्वताश्च भवन्तीति (भा)

भाष्येणेत्यर्थः॥

[३]ग्रामशब्दोऽयम् (भा)

इत्यस्य

[४]तद्यः सारण्यक (भा)

इत्यस्यचाविरोधायाह

केचिदिति। (कै)

अन्यायश्चानेकार्थत्वमिति तदाशयः। "सामान्यं" च ग्रामशब्दत्वादि॥

---

१ तद्रूपेण। क॥

२ "व्यवहितेऽप्यनन्तरशब्दो दृश्यते। तद्यथा। अनन्तरावेमौ ग्रामावित्युच्यते तयोश्चैवान्तरा नद्यश्च पर्वताश्च भवन्ति" इत्यत्रैव भाष्ये॥

३ "ग्रामशब्दोऽयं वक्तव्यः" अत्रैव भाष्ये॥

४ "अस्ति सारण्यके ससीमके सस्यखिलके वर्त्तते। तद्यथा। ग्रामो लब्ध इति। तद्यः सारण्यके ससीमके सस्यखिलके वर्त्तते तमभिसमीक्ष्येतत् प्रयज्यते" इत्यत्रैव भाष्ये॥

अन्ये त्विति । (कै)

व्यक्तिभेदकल्पनायां गौरवमिति तदाशयः ॥

तच्च चेति । (कै)

निरूपकभेदाच्छक्तिभेद इति भावः ॥

एकेति । (कै)

समवायैकत्वनये "रसो रूपवान्" इत्यादिप्रयोगवदन्यार्थबोधकालेऽन्यार्थबोधो वारणीयः । तदर्थसम्बन्धेन शक्त्यग्रहात् । तत्तदर्थविशिष्टशक्तिभेदेन च नानार्थत्वव्यवहार इति भावः ॥

तच्च यदेति । (कै)

एकशक्तित्वपक्षे त्वर्थभेदादुपचरितभेदाश्रयमिति बोध्यम् ॥

ग्रामशब्दोऽयं बह्वर्थ इति (भा)

तु मुख्यार्थमेव । अत्र सर्वार्थनिरूपितवृत्तीनां वर्त्तते इत्येकशब्दबोधत्वेनाभेदबोधनादेकशक्तित्वपक्षो भाष्यबोधितः । तत्र वर्त्तनक्रिया अस्तिक्रियायाः कर्त्री शालासमुदायादौ ग्रामशब्दस्य वृत्तिरस्तीत्यर्थः ॥ वाटपरिक्षेपो नाम शालासमुदाय रक्षणाय सर्वतो मार्गप्रतिरोधकं यत् परितः क्षिप्यते तदुच्यते ॥ सारण्यकसमीपकवृत्तिस्त्वत्र न गृह्यते इत्याह

शुचाविति । (कै)

सीमनीति च ॥ (कै)

मुखनासिकावचनोऽनुनासिकः।१।१।८॥

[1]प्राण्यङ्गत्वादिति। (कै)

एतेनेतरेतरयोगद्वन्द्वे रूपसिद्धिरित्यपास्तम्॥

[2]अर्थ इति। (कै)

अभिमतोऽर्थ इत्यर्थः॥ सौचत्वादिति कुतो नोक्तमित्यत आह

प्रसङ्गेनेति॥ (कै)

[3]अबाधकत्वेति। (कै)

पक्षे तु (कै)

इत्यनेनाबाधकत्वस्वीकर्त्तृवृत्तिमतमसङ्गतमित्युक्तम्। भाष्यकृदसम्मत-रूपापत्तेः॥

[4]बाधकान्येव निपातनानीति (भा)

[5]सर्वादि- (पा)

सूत्रे भाष्योक्तेः॥

---

१ प्राण्यङ्गत्वात् समाहारद्वन्द्वे क्रमत्वेन भाव्यम्॥ कै॥

२ अवचनमिति नञ समासाश्रयणे अर्थो न सङ्गच्छत इति प्रश्नः। कै॥

३ अबाधकत्वपक्षे तु भाव्यमेव। कै॥

४ बाधकान्येव हि निपातनानि भवन्ति (१। १। २७) भाष्ये।

५ अ।१। पा१। आ२७॥

अस्मिन् पक्ष इति। (कै)

आङ्रहितस्येति शेषः। वस्तुत आद्यपदैकवाक्यतया आङ्रहितै-तत्पदवचनपदाभ्यां समासस्यानभिधानमेवेत्याशयः॥

ननु भागस्य मुखाद्युच्चार्यत्वेन मुखनासिकं वचनमुच्चारणकरणं यस्य वर्णस्येत्यर्थको मुखनासिकवचन इति प्रयोगस्तत्रामङ्गतोऽत आह

[1]यो हीति॥ (कै)

सहायेति। (कै)

अव्युत्पन्नो द्वितीयशब्दः सहायवाचीत्यर्थः॥

[2]शाकपार्थिवादित्वाद् उत्तरपदलोपे शब्दानित्यत्वापत्तिरत आह

तदेति। (कै)

परन्त्विदं चिन्त्यम्। भाष्यकृता एवं रीत्या तदप्रत्याख्यानात्॥

मुखस्य चेति। (कै)

उपशब्दस्य सामर्थ्यादिति भावः॥ यद्यपि वचनशब्दे कर्मणि ल्युटि मुखनासिकेनावचनः। मुखनासिकया वचन इति वा तत्पुरुषोऽपि वक्तुं शक्यस्तथापि कर्मणि तस्य बाहुलकलभ्यत्वात् करणे ल्युटा बहुव्रीहिरेवाश्रितो भाष्ये॥ तत्रान्ययोर्नासिकाशब्द-सामानाधिकरण्यात् स्त्रीत्वविशिष्टस्यैव करणत्वेन ल्युटि ङीपि

---

१ यो हि ईषदुच्यते स उच्यत एव। कै॥

२ वर्णो वर्णेन। अ २। पा १। सू ६९॥ एतत् सूत्रस्यवार्त्तिकम्॥

(अ. १। पा. १। आ. ४) (मुखनासिकावचनोऽनुनासिकः । १। १। ८।)

[1]**नद्यृतश्च** (पा)

इति कबापत्तिरत आह

पदसंस्कारेति ॥ (कै)

भागस्य मुखेनोच्चारणाननुभवादाह

तच्चेति । (कै)

[2]**तस्यादित** (पा)

इति सूत्रस्थरमाद्वर्णानां सखण्डत्वमित्याशयः । ये तु तत्तद्देशावच्छिन्नवाय्वाद्यभिघातस्य तत्तद्वर्णजनकत्वात् स्थानानां करणत्वमेव । स्थानव्यवहारस्तु वर्णजनकवायुसंयोगाधारत्वाद्वर्णाधारत्वमारोप्य । अत एवोत्तरसूत्रे भाष्ये

[3]**अस्यन्त्यनेन वर्णानित्यास्यमिति** (भा)

करणे व्युत्पत्तिर्दर्शितेति वदन्ति । तन्मते प्रासादवासिदृष्टान्तासङ्गतेराह

भाष्येण चेति । (कै)

एतेन कण्ठादिकन्तु स्थानं नासिका तु करणमिति मन्दोक्तमपास्तम् । अत एवाच सूत्रे हरिणा

---

१ अ५। पा ४। सू १५३ ॥

२ अ १। पा २। सू ३२ ॥

३ "किं पुनरास्यम् । लौकिकमास्यम् । ओष्ठात् प्रभृति प्राक् काकलकात् । कथं पुनरास्यम् । अस्यन्त्यनेन वर्णानित्यास्यम् । अन्नमेतदास्यन्दते इति वा आस्यम्" (१ । १ । ९) भाष्ये ॥

"स हि वर्णो न मुखेनैव नापि
नासिकयैव चात्मवृत्तिं लभते
किन्तु वायुनाऽनुपरतशक्तिनाऽ-
न्यतरकरणमभिहत्याऽ-
न्यतरकरणेऽभिहन्यमाने आत्म-
व्यक्तिं लभते" (हरिः)

इत्युक्तम् । यमो नाम वर्गपञ्चमे परे वर्गाद्यचतुष्टयाऽन्यतमसदृशो वर्णः । "आदितश्चत्वारो वर्णा" इति विवरणेऽपि चतुःशब्दस्य चतुःसदृशे लक्षणा बोध्या। अत एवायोगवाहलप्रतिपादक-

हयवरट् (५)

सूत्रस्थभाष्याविरोधः ॥

न्यायानवतारेति । (कै)

कचटतपानामेव (भा)

इत्येवकारोऽन्यत्रैव पचे नासिकाया आस्यबाह्यत्वपचे च बोध्यः ॥

अप्रतिपत्तिरिति । (कै)

अत्र [१]"विड्वनोर्जम" इति वक्तुं [२]शक्यम् ।

[३]यरोऽनुनासिक (पा)

---

१ विड्वनोर्यम इति । क । विड्वनो जम इति । ग ॥

२ विड्वनोर्जम इति वक्तुं युक्तम् । ख ॥

३ अ८ । पा ४ । सू ४५ ॥

(अ. १। पा. १। आ. ४) (मुखनासिकावचनोऽनुनासिकः। १। १। ८।)

इत्यत्र त्वप्रतिपत्तिः। तत्र "अमि अम्वा" [1]इत्युक्तेः सकलेष्टसिद्धेः॥

चकारलोपेति। (कै)

निष्ठावत्वकुत्वयोरसिद्धत्वात्यचेः

[2]अनुदात्तोपदेशवनति (पा)

इत्यनेनेति भावः॥

ननु [3]प्रासादवासिन्यायेन मुखग्रहणप्रत्याख्यानवत् सूत्रमेव कुतो न प्रत्याख्यायते इत्यत आह

---

१ इत्युक्तेः सकलेष्टसिद्धेः। क। इत्युक्ते सकलेष्टसिद्धिः। ख। इत्युक्ते सकलेष्टासिद्धेः। सम्। ग। इ॥

२ अ ६। पा ४। सू ३७॥

३ अथ मुखग्रहणं किमर्थम्। नासिकावचनोऽनुनासिक इतीयत्युच्यमाने यमानुस्वाराणामेव प्रसज्येत। मुखग्रहणे पुनः क्रियमाणे न दोषो भवति। अथ नासिकाग्रहणं किमर्थम्। मुखवचनोऽनुनासिक इतीयत्युच्यमाने कचटतपानामेव प्रसज्येत। नासिकाग्रहणे पुनः क्रियमाणे न दोषो भवति। मुखग्रहणं शक्यमकर्तुम्। केनेदानीमुभयवचनानां भविष्यति। प्रासादवासिन्यायेन। तद्यथा। केचित् प्रासादवासिनः। केचिद् भूमिवासिनः। केचिद् उभयवासिनः। ये प्रासादवासिनो गृह्यन्ते ते प्रासादवासिग्रहणेन। ये भूमिवासिनो गृह्यन्ते ते भूमिवासिग्रहणेन। ये उभयवासिनो गृह्यन्ते ते प्रासादवासिग्रहणेन भूमिवासिग्रहणेन च। एवमिहापि केचिन्मुखवचनाः केचिन्नासिकावचनाः केचिदुभयवचनाः। तत्र ये मुखवचना गृह्यन्ते ते मुखग्रहणेन ये नासिकावचना गृह्यन्ते ते नासिकाग्रहणेन ये उभयवचना गृह्यन्ते एव ते मुखग्रहणेन नासिकाग्रहणेन च। भवेदुभयवचनानां सिद्धम्॥

अयमिति । (कै)

योगेन ह्युभयग्रहणं स रूढ़िषु नास्तीत्यर्थः॥ अनुनासिकशब्दस्य च रूढ़िशब्दत्वम्। तस्य क्रियाशब्दत्वन्तु वक्तुमशक्यम्॥ अनु पश्चान्नासिका व्याप्रियते यस्मिन्निति योगस्य अमङ्णनेषु निरूपयितुमशक्यत्वाद् विनिगमनाविरहेण युगपदुभयोर्व्याप्तेः[१]। एतेन अनु पश्चान्नासिकां गत इत्यर्थको नासिकानुगत इति प्रयोगोऽपि परास्तः। यथा कथञ्चिद् योगोपादाने तु रूढ़िरेव फलितेति दिक्॥

तुल्यास्यप्रयत्नं सवर्णम् ।१।१।९॥

तत्पुरुष इति । (कै)

तुल्यास्यशब्दयोः

[२]मयूरव्यंसकादित्वात्

पूर्वपदार्थप्रधानस्तत्पुरुषः। आस्यप्रयत्नशब्दयोश्च "साधनं कृते"त्यनेन समासः॥ ननु स्थानादिकं न तुल्यया संज्ञीयते अत आह

व्युत्पत्त्यर्थमेवेति॥ (कै)

किं सुखमिति । (कै)

---

१ व्याकृत्तेः। ग॥

२ मयूरव्यंसकादयश्च। अ २। पा १। सू ७२॥

अतद्धितान्ततद्धितान्तास्यशब्दविषयकसन्देह इत्याशयः॥ तद्धितान्तमपि लौकिकमेव न वैदिकमित्यत आह

पशुरिति॥ (कै)

झटिति। (कै)

पदश्रवणमात्रेणेत्यर्थः॥

निमित्तवशात् (कै)

अवयवार्थवशात्॥

जातिस्फोटेति। (कै)

वर्णान् इति (भा)

वर्णपदं बोधकपरं तच्च जातेर्बोधकत्वे तस्या नित्यत्वादभिव्यक्तिरसनम्। तदाश्रयव्यक्तीनां वाचकत्वे तूत्पत्तिरिति भावः। अत एव

वर्णानिति (भा)

बहुवचनं संगच्छते। एकैव व्यक्तिस्तत्तद्रूपेणाभिव्यक्ता वाचिकेति पक्षे तदसंगतिः स्पष्टैव॥ कचित्तु

व्यक्तिस्फोटपक्षेऽभिव्यक्तिः। (कै)

जातिस्फोटपक्षे तूत्पत्तिः (कै)

इति पाठः। अयमेव साम्प्रदायिकः पाठः॥ एकैव व्यक्तिर्वाचिका। कत्वादिकन्तु ध्वनिनिष्ठं ध्वनिविशेषव्यङ्ग्यं वा सा च नित्येति व्यक्तिस्फोटवादस्तदाभिव्यक्तिः स्पष्टैव॥ बहुवचनं त्वेकस्यैव बहुरूपत्वादारोपित बहुत्वमादाय नेयम्॥

व्यक्तयोऽनन्ता जन्याश्च तत्र

जातिरेव शक्तेति

जातिस्फोटवादस्तदोत्पत्तिरित्यर्थः ॥

[1]अन्येष्वपीति ।

दृग्रिग्रहणाद्ध्रुवन्नरादपि स इति भावः ॥ ननु साधनशब्देन कारकशक्तिरभिधीयते इति भावस्य साधनत्वमनुपपन्नमत आह

भावे इति ॥ (कै)

नङ् । (कै)

[2]यजयाच

इत्यनेन ॥

ननु तुल्यावास्यप्रयत्नमाचौ येषां जनकावित्यर्थे नासिकास्थान-अङादिनिवृत्त्यर्थमास्यपदोपादानं स्यादत आह

नासिकापीति । (कै)

एवं चास्यग्रहणे कृतेऽपि तद्व्यावृत्तिर्दुरुपपादेति भावः । वस्तुतस्तु अवधारणगर्भसमासे ह्रस्वाकारादिभिर्ह्रस्वाकारादीनां सावर्ण्यना-पत्तिः ॥ तज्जनकवायुसंयोगादीनामपि तुल्यत्वात् ॥ अनवधारण-गर्भसमासे त्वनुनासिकव्यावृत्तिरपि दुरुपपादैवेति भाष्याशयः ।

एवं च नासिकाया बाह्यत्वेऽपि न क्षतिः । अत एव

---

१ अन्येष्वपिदृश्यते ॥ अ ३ । पा २ । सू १०१ ॥

२ यजयाचयतविच्छप्रच्छरक्षो नङ् ॥ अ ३ । पा ३ । सू ९० ॥

[1]मुखनासिकेति- (पा)

सूत्रे

[2]मुखं च नासिका चेति (भा)

[3]मुखद्वितीया नासिकेति (भा)

च विग्रहप्रदर्शनं भाष्ये । न ह्यवयवावयविविषये एवं प्रयोगः सचेतसाम् । सहस्तो देवदत्त इत्यादौ विद्यमानवाची सह शब्दः । अत एव

[4]मुखवचनोऽनुनासिक इतीयत्युच्यमाने कचटतपानामेव प्रसज्येत (भा)

इति भाष्ये एव शब्दः सङ्गच्छते । अन्यथा यमादीनां ङादीनां च मुखवचनत्वात् तदसङ्गतिः स्पष्टैव । आस्यानन्तर्गतत्वे तु न दोषः । मुखमात्रवचनत्वाभावात् । प्रासादवासिन्यायप्रदर्शकभाष्येणापि ध्वनितमेतत् ॥ कैयटोक्तास्यान्तर्गतत्वपक्षे तु सूत्रे मुखपदं मुखावयवपरम् ॥

---

१ अ १। पा १। सू ८ ॥

२ किमिदं मुखनासिकावचन इति । मुखं च नासिका च मुखनासिकम् । मुखनासिकं वचनमस्य सोऽयं मुखनासिकावचनः । भाष्ये ॥

३ अथवा मुखनासिकमात्रवचनमस्य सोऽयं मुखनासिकावचनः । अथ किमिदमात्रवचनमिति । ईषद्वचनमात्रवचनम् । किं चिन्मुखवचनं किं चिन्नासिकावचनम् । मुखद्वितीया वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः । उक्तं भाष्ये ॥

४ मुखनासिकेति सूत्रे भाष्ये उक्तम् ॥

ब्राह्मणवमिष्ठन्यायेन च नासिकातिरिक्तावयवग्रहणम् ॥ एवकारस्याप्यर्थः । दृष्टान्तोऽप्येकांशेन बोध्य इति ॥

नन्वेवमपि विसर्जनीयव्यावृत्तये तत्स्यादत आह

विसर्जनीयस्येति । (कै)

ततश्चान्येषां कण्ठादिस्थानमेवेति भावः ॥ [1]उरस्यमतेऽप्याह

सावर्ण्याभावेऽपीति ॥ (कै)

ननु इदानीमेव किं नोच्यतेऽत आह

नास्येति ॥ (कै)

द्वन्द्वे प्रयत्नस्यास्येनाविशेषणाद् (कै)

इत्यस्योपयोगश्चिन्त्यः ॥

अचेति । (कै)

एतद्वर्णसमूहमाध्यप्रत्याहारे इत्यर्थः ॥ ऊर्क् अन्नं तस्माज्जात

ऊर्ग्जः ॥ (कै)

आस्ये इति । (कै)

देशविशेषणवैयर्थ्याभिप्रायेण प्रश्न इति भावः ॥ न च नासिकाया आस्यानन्तर्गतत्वपक्षे तद्व्यावृत्तये देशविशेषणमावश्यकमिति वाच्यम् । अनुनासिकाकारादिषु कण्ठादिषु वाय्वभिघातादभिव्यक्तेषु वर्णेषु नासिकाभिघातेनानुनासिक्यं धर्म उत्पद्यते इत्यनुभवेन

---

१ विसर्जनीयस्यैकीयमतेन उरस्यत्वात् सावर्ण्याभावेऽपि न दोषः । इति कैयटः ॥

(अ. १। पा. १। आ. ४) (तुल्यास्यप्रयत्नं सवर्णम् । १। १। ९।)

[1]वृद्धिरादैच् (पा)

सूत्रस्याद्

[2]भेदकत्वाद् गुणस्येति

वाच्यम् आनुनासिक्यसंग्रहार्थं तद्यथा

एकोऽयमात्मा

दृत्यादिभाष्यकैयटात् तथैव लाभेन च तेषु नासिकाया देशत्वा-भावस्य कृत्स्नत्वात् । आदिष्वपि तथैवेत्यभिमानात् । देशपदेन ताल्वादिस्थानमेवोच्यते दृति जबगडादिषु न दोषः ॥ भाष्ये

प्रयत्नविशेषणमिति (भा)

देशप्रयत्नमितिद्वन्द्वस्तु सौत्रत्वात् साधुरिति भावः ॥

स्पृष्टतेत्यादि ॥ (कै)

आस्यान्तर्गततत्तत्स्थानेषु जिह्वाद्यादीनां वर्णाभिव्यक्तिजनक-स्पर्शेषत्स्पर्शदूरावस्थानसमीपावस्थानरूपाभ्यन्तरकार्यकारिप्रयत्नविशेषा एतैः पदैरुच्यन्ते । तेषां चास्यान्तर्गतत्वमास्यान्तर्गततत्तत्स्थानेषु वायुसंयोगजनकत्वेनेति बोध्यम् ॥

---

१ अ १ । पा १ । सू १ ॥

२ भेदकत्वाद्गुणस्येति वक्तव्यम् । किं प्रयोजनम् । अनुनासिक्यं नाम गुणः । तद्विज्ञस्यापि ग्रहणं यथा स्यात् । किं च कारणं न स्यात् । भेदकत्वाद् गुणस्य । भेदका गुणः । कथं पुनर्ज्ञायते भेदका गुणा इति । एवं हि दृश्यते लोके । एकोऽयमात्मा उदकं नाम तस्य गुणभेदादन्यत्वं भवति अन्यदिदं शीतमन्यदिदमुष्णमिति । वृद्धिरा-दैच् इति सूत्रे भाष्ये ।

(तुल्यास्यप्रयत्नं सवर्णम्। १। १। ९।) (आ. १। पा. १। अ. ४)

आस्ये (के)

इत्यस्य यत्कार्यं तज्जनक इति शेषो वा ॥

भाष्ये

[१]ते ह्यापिता इति। (भा)

सवर्णसंज्ञा (भा)

स्वनिमित्तत्वेन वाह्यान् प्रयत्नान् जहातीति तया ते स्वनिमित्तत्वं "ह्यापिता" इत्यर्थः ॥

विवारसंवारौ (भा)

कण्ठविलस्य विकाममङ्कोचौ विवृतः कण्ठो यैः श्वासोऽनुप्रदीयते यैरित्यर्थः ॥

[२]एके। (भा)

उक्तवाक्ययोः प्रथमोपात्ताः ॥

[३]नादः (भा)

वर्णोत्पत्त्यनन्तरभावौ ॥

---

१ सन्ति हि आस्याद्बाह्याः प्रयत्नाः। ते ह्यापिता भवन्ति। तेषु सत् स्वसत्त्वपि सवर्णसंज्ञा सिद्धा भवति। के पुनस्ते। विवारसंवारौ श्वासनादौ घोषवदघोषता अल्पप्राणता महाप्राणतेति। अत्रैव भाष्ये ॥

२ तत्र वर्गाणां प्रथमद्वितीया विवृतकण्ठाः श्वासानुप्रदाना अघोषाः। एके अल्पप्राणा अपरे महाप्राणाः ॥

३ तृतीयचतुर्थाः संवृतकण्ठा नादानुप्रदाना घोषवन्तः। एके अल्पप्राणाः अपरे महाप्राणाः ॥

अनुः

अणनरूपः शब्दः ॥

[1]यथा तृतीया इति । (भा)

अनेन तेषामल्पप्राणत्वं बोधितम् ॥

देशविशेषणमप्यास्यग्रहणमावश्यकमिति गूढाग्रयेनाह भाष्ये

आनुनासिक्यमेषामधिको गुण इति । (भा)

अयं भावः । अत्र देशपदेन तालवादिस्थानमुच्यते स्थानशब्देन च योगरूढ्या वर्णाभिव्यक्तिजनकवायुसंयोगानुयोगि तालवाद्युच्यते। तत्र यद्यपि अकारादीनां गुणमात्र जनिका नासिका स्वरूपस्य कण्ठादिभिरेवाभिव्यक्तिसिद्धेस्तथापि अादीनां स्वरूपस्य न केवलतालवादिना नापि केवलनासिकयाऽभिव्यक्तिरितिविनिगमनाविरहादुभयावच्छिन्नवायुसंयोगस्यैव तज्जनकत्वात् तेषां नासिकाऽपि स्थानम्। न चैवं त्वं करोषीत्यादौ चरितार्थं परसवर्णशास्त्रं सम्यँन्त्योत्यादौ न प्रवर्त्तत। उक्तरीत्या यादीनां नासिकास्थानत्वाभावेन स्थानत आन्तर्याभावादिति वाच्यम्

[2]स्थानेऽन्तरतमे

इति सप्तम्यन्तपाठस्य दूषितत्वेनास्या युक्तेर्गर्भस्रावात्। अनुनासिकाकारादीनामपि सा स्थानमिति त्वयुक्तमेव। एवं हि उत्पादकसामग्री-

---

१ यथा तृतीयास्तथा पञ्चमाः। आनुनासिक्यवर्जम् ॥

२ अ १। पा १। सू ५० ॥

(तुल्यास्यप्रयत्नं सवर्णम् । १। १। ९।) (अ. १। पा. १। आ. ४)

भेदात्कण्ठ्योरिव स्वरूपभेदस्यैवापत्तौ [1]अभेदकगुणपक्षेऽपि निरनुनासिकैः सानुनासिकग्रहणानापत्तिः । एवं च

यावत्स्थानसाम्ये सवर्णसंज्ञेति

सिद्धान्ते नासिकारूपदेशभेदात् कण्ठादीनामप्राप्तसावर्ण्यसिद्धये आस्येन देशविशेषणमावश्यकम् । नासिकाया आस्यान्तर्गतत्वेऽपि

[2]मुखनासिकेति- (पा)

सूत्रे नासिकातिरिक्तावयवकमुखस्यैव ग्रहणेन तत्साहचर्यात् अत्राण्यस्यपदेन तादृशस्यैव ग्रहणं बोध्यम् । अन्यथाऽत्र 'स्थाने' एतत्कथनवैयर्थ्यापत्तिः । आस्यग्रहणव्यावर्त्यानां सावर्ण्यानुपयुक्तानां प्रदर्शनमेव ह्यत्र प्रक्रान्तम् । नत्वेदं प्रयत्नविशेषणास्यग्रहणव्यावर्त्यमेवास्तु । अनुनासिकयकारादीनां आदिभिः सावर्ण्यं च व्यावर्त्यम् । तत्फलं च "तञ् त्रुडवे" "तन्नमती"त्यादौ

[3]अनुस्वारस्य ययो- (पा)

त्यनेन यंकारलकारयोरनुनासिकयोरभाव इति वाच्यम् । अनु-

---

१ ननु च भो अभेदका अपि गुणा दृश्यन्ते । तद्यथा । देवदत्ता मुखेऽपि जघ्यपि शिरस्यपि स्त्रामाख्यां न जहाति । तथा बालो युवा वृद्धो वत्सो दम्यो वलीवर्द इति । उभयमिदं गुणेषु उक्तं भेदका अभेदका इति । किं पुनरत्र न्याय्यम् । अभेदका गुणा इत्येव न्याय्यम् । (१। १। २।) भाष्ये ॥

२ अ १। पा १। सू ८ ॥

३ अ ८। पा ४। सू ॥ ५८ ॥

स्वारस्य नासिकास्थानत्वेन स्थानतोऽन्तरतमयोर्ञनयोरेव प्रवृत्तेः। अनुनासिकयादीनां तु उकरीत्या न नासिकास्थानमित्यदोषात्। दृदमेव ध्वनयितुं

गुण- (भा)

इत्युक्तम्। गुणपदेन च सावर्ण्यानुपयोगिन आन्तरतम्यपरीक्षोपयोगिनो विवारादय उच्यन्ते। एवं च तत्सादृश्याद् अत्रापि गुणशब्दप्रयोगः॥ अत एव बाह्यप्रयत्नानुपक्रम्य "आभोऽनुनासिका न ह्रावि"ति शिक्षायामुक्तम्। अत एव

उदात्तादिभिः सहैकादश बाह्याः
प्रयत्नाः (कै)

इति कैयटोक्तम्॥

उदात्तादीनामपि वृद्धिसंज्ञासूत्रशेषे गुणत्वेन व्यवहारात्। अत एव

एवमप्यवर्णस्य [1]संज्ञा न प्राप्नोति।
बाह्यं ह्यास्यात् स्थानमवर्णस्य।
एवमपि व्यपदेशो न प्रकल्प्यते।
आस्ये येषां तुल्यो देश इति। (भा)

भाष्यं स्वरसतः सङ्गच्छते। अन्यथा प्रयत्नविशेषणमात्रस्योक्तेर्देशविशेषणत्वाभावेन तदसङ्गतिः स्पष्टैव। आस्येन देशविशेषणाभावान्न-

---

१ भाष्ये "सवर्णसंज्ञा" इत्यस्ति॥

दोष इत्येव वक्तव्ये "सर्वमुखे" त्यादि समाधानस्यापि निर्दुष्टत्वापत्तिश्च ॥

एके (भा)

इत्यनेन सर्वमतं तु कण्ठस्थानमिति ध्वनयति ।

व्यवहितस्येति । (कै)

यद्यपि 'रूढियोगापहारिणी' तथाप्यास्यपदोपादानसामर्थ्याद्व्यवहितस्यापि ग्रहणमिति भावः ॥

तास्वादीति ।

ग्रिच्चयां तेन रूपेणैव वर्णस्थानत्वकथनादिति भावः ॥ एतेन तास्वादिष्वूर्ध्वाधोभागभेदादुदात्तादीनां सवर्णसंज्ञा न प्राप्नोतीत्यपास्तम् ॥ आस्यभवशब्देन तद्रूपावच्छिन्नस्यैव ग्रहणेनादोषात् ॥ ननु प्रयत्नपदेनैव तद्ग्रहणसिद्धिरत आह

[1]जिह्वाया अग्रे- (कै)

त्यादि ॥

प्रत्येकं त्विति । (कै)

प्रत्येकनिरूपित सादृश्यग्रहणनिरासार्थमित्यर्थः ॥ यद्यपि ज्ञापकेनापि प्रत्येकव्यापारनिरासः सुकरस्तथापि यावदास्यभवैक्यविवक्षायां ह्रस्वदीर्घयोः सावर्ण्यानापत्तिः । तत्तज्जनकवायुसंयोगानामतुल्यत्वात् । अतः प्रयत्नपदमास्यपदेन स्थानमाचष्टे ग्रहणार्थं

---

१ जिह्वाया अग्रोपाग्रमध्यमूलानि वा । कैयटः ॥

[1]**स्थानं करणं चेति** (भा)

भाष्ये करणपदेन वायुसंयोगोऽपि प्रयत्नग्रहणाच्च नातिप्रसङ्ग इति तात्पर्य्यम्॥ अत एव यावत् स्थानैक्यपरेण

नैतौ तुल्यस्थानौ (भा)

इति भाष्येण न विरोध इति दिक्॥ भाष्ये

[2]**प्रारम्भो यत्नस्येति।** (भा)

अत्र

यत्नस्येति (भा)

निर्द्धारणे षष्ठी जातावेकवचनम्॥

आरम्भ इति (भा)

कर्मणि घञ्॥ यत्नानां मध्ये प्रथमं वर्णोत्पत्तेः पूर्व्वमारभ्यमाण इत्यर्थः॥ अत्रापि नासिकाया अग्रहणमुपपादितरीत्यैवेति बोध्यम्। अत्रेदं बोध्यम्। शब्दप्रयोगेच्छ्योत्पन्ननाभिप्रदेशात् प्रेरितो वायुर्वेगान्मूर्धपर्य्यन्तं गत्वा ततः प्रतिनिवृत्तो यत्नविशेषसहायेन तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्व्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति। ततो यत्नविशेषसहायेन परावृत्तिसमये गलविवरादीनां विकासादीन् करोति। तत्र ये तत्तत्स्थानानामभिघातका

---

१ नहि लौकिकमास्यम्। किं तर्हि। तद्धितान्तमास्यम्। शरीरावयवाद् यत्। किं पुनरास्ये भवम्। स्थानं करणं च॥

२ एवमपि प्रयत्नोऽविशेषितो भवति। प्रयत्नश्च विशेषितः। कथम्। नहि प्रयतनं प्रयत्नः। किं तर्हि। प्रारम्भो यत्नस्य प्रयत्नः॥

यत्नास्ते आस्यान्तर्गततत्तत्कार्य्यकारित्वाद् "आस्ये प्रयत्ना" इत्युच्यन्ते "आभ्यन्तरा" इति "प्रारभ्य" इति च । गलविवरादिविकासादिकरास्यास्यबहिर्भूतदेशे कार्य्यकरत्वाद्बाह्याः ॥ एवं माचाकालिकत्वादिकमपि वाय्वल्पत्वमहत्त्वकृतमिति नाभिप्रदेशात् प्रेरकयत्न एव कश्चिद्विलक्षणोऽल्पवायुं प्रेरयति कश्चिदधिकमिति तस्य प्रयत्नस्य वायुप्रेरणारूपकार्य्यमास्यबाह्यदेशमिति तस्यापि व्यावृत्तिरास्यपदेनोक्ता "अइउण" सूत्रे भाष्ये । [१]"मूर्ध्नि प्रतिहते वर्णोत्पत्तेः पूर्वं स्पृष्टतादयः पश्चान्निवृत्ते प्राणाख्ये" इत्यन्वयः कैयटे । अत एव

[२]"सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णान् जनयत-" (पा—शि)

इति न शिक्षया विरोध इति दिक् ॥

भाष्ये

यदि प्रारभ्य (भा)

इत्यत्र "यदी" त्यस्य यद्यपीत्यर्थः ॥

---

१ अत्र पूर्वं स्पृष्टतादयश्चत्वारः पश्चान्मूर्ध्नि प्रतिहते निवृत्ते प्राणाख्ये वायौ विवारादयो बाह्या एकादशप्रयत्ना उत्पद्यन्ते । कै ॥

२ सोदीर्णो मूर्ध्नमभिहतो वक्त्रमापद्य मारुतः ।
वर्णान् जनयते तेषां विभागः पंचधा स्मृतः ॥९॥
पाणिनीयशिक्षा ॥

[1]अकारेणेति। (कै)

ततश्च स्वसवर्णाकारस्य तच्च सत्त्वेन तद्द्वारा तुल्यस्थानत्वेनावर्णैङोः सावर्ण्यं "गय्यमि"त्यत्र च

[2]यस्येति (पा)

लोपप्रसङ्ग इत्यभिमानः॥

पांसूदकेति। (कै)

[3]"प्रश्लिष्टौ" इत्यस्य प्रकर्षेण श्लिष्टौ मिलितावित्यर्थः। ततश्च तदननुभवेन केवलताल्वादिस्थानकत्वेन च न तयोः सावर्ण्यप्राप्तिरिति भावः॥

विभागोऽचेति। (कै)

एवं च पूर्ववत् तयोः सावर्ण्यं प्राप्नोत्येवेत्यर्थः। भाष्ये एतदुत्तरं

[4]विवृततरावर्णौ (भा)

इति। एवं च तद्द्वारा एतयोरपि विवृततरत्वेन प्रयत्नभेदाद्भेदेन न सावर्ण्यमाकारस्य ततोऽपि विवृततरत्वात् तेनाप्यनयोर्न सावर्ण्यं फलाभावश्चेति भावः॥

---

१ "एवमपीति" भाष्यप्रतीकमुपादाय "सन्ध्यक्षरेषु प्रथमभागस्याकारेण सादृश्यात् सवर्णसंज्ञाप्राप्तिरिति प्रश्नः" इत्युक्तम्॥
२ अ ६। पा ४। सू १४८॥
३ एवमप्यवर्णस्यैङोश्च सवर्णसंज्ञा प्राप्नोति। प्रश्लिष्टावर्णावितौ। अत्रैव भाष्ये॥
४ अवर्णस्य तर्हि एचोश्च सवर्णसंज्ञा प्राप्नोति। विवृततरावर्णावितौ। भा-॥

[1]एतयोरेवेति। (भा)

यत्किञ्चित्स्थानसाम्ये सवर्णसंज्ञा इत्यभिमानः॥

[2]क्वचित्। (कै)

[3]अदसोऽसेर्दादु दो मः (पा)

इत्यादौ॥ भाष्ये

नैतौ तुल्यस्थानौ इति। (भा)

[4]तोर्लि (पा)

इति परसवर्णरहित-

[5]तदानासाम् (पा)

इति निर्देशाद् यावत्स्थानसाम्यमत्रविवक्षितमिति भावः॥ यत्तु "एषां समुदितं स्थानम्" इति। तन्न।

[6]"——दन्त्योष्ठ्यो वः स्मृतो बुधैः।
ए ऐ तु कण्ठ्यतालव्यौ ——" ॥ (पा—शि)

---

१ एतयोरेव तर्हि मिथः सवर्णसंज्ञा प्राप्नोति। अत्रैव भाष्ये॥

२ भाव्यमानेनापि क्वचित् सवर्णग्रहणदर्शनात्॥
अ ८। पा २। सू ८०॥

४ अ ८। पा ४। सू ६०॥

५ तदानासामुपधानो मन्त्र इतीष्टकासु लुक्च मतोः। ४। ४। १२५।

६ जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः।
ए ऐ तु कण्ठ्यतालव्यावो औ कण्ठोष्ठ्यौ स्मृतौ॥१८॥
पाणिनीयशिक्षा॥

इति शिचायां प्रत्येकं

[1]तच्च भव (पा)

इत्यधिकारस्थयद् अनापत्तेः । "दन्तोष्ठ्य" इति पाठस्त्वसङ्गतः । शरीरावयवसमुदायस्य शरीरावयवत्वाभावात् । स्वाङ्गसमुदायस्य स्वाङ्गत्वाभाववत् । स्वजनकवायुसंयोगावच्छेदके कण्ठादौ स्वाधारत्वमारोप्य कण्ठे भव इत्याद्युपपत्तिः । शरीरे मे वेदनेत्यत्रेवमेवेति दिक् ॥

[2]उदात्तादीनां तर्हि इति (भा)

यावत्स्थानैक्यवद् यावत्प्रयत्नैक्यविवक्षणादितिभावः ॥ "स्वग्रब्दा" उदात्तादिग्रब्दाः । एवं चात्र प्रयत्नग्रब्देनोदात्तादीनां न ग्रहणमिति भावः ॥

भाष्ये

[3]उदात्तादीनां सवर्णसंज्ञा न प्राप्नोति (भा)

इत्यस्य "आस्येन"

[4]प्रयत्नोऽविग्रेषितः (भा)

इत्यस्य च समाध्यन्तरमाहैकदेग्री ।

---

१ अ ४ । पा ३ । सू ५३ ॥

२ नैतौ तुल्यस्थानौ । उदात्तादीनां तर्हि सवर्णसंज्ञा न प्राप्नोति । अभेदका उदात्तादयः । भा ॥

३ "उदात्तादीनां तर्हि सवर्णसंज्ञा न प्राप्नोति" इति पाठोऽस्युपलब्धभाष्यपुस्तके ॥

४ अविग्रेषितः । "आस्येन इत्यर्थ" इति कैयटः ॥

(तुल्यास्यप्रयत्नं सवर्णम् । १। १। ९।) (अ. १। पा. १। आ. ४)

अथवा किं न एतेनेति। (भा)

"नो"ऽस्माकमेतेन प्रारम्भोयत्नस्येत्यर्थकप्रयत्नशब्दाश्रयणेन "किम्" इत्यर्थः। क्लिष्टत्वादितिभावः॥

बाह्यप्रयत्नभेदेऽपीति। (कै)

एवमुदात्तादिभेदेऽपि भविष्यतीत्यपि बोध्यम्। यद्यपि सवर्णसंज्ञाया न प्रयत्नभेदगर्भत्वं तथापि ज्ञापकादेतदर्थसिद्धिरित्याह

[1]झरो झरीति॥ (पा)

भाष्ये

[2]सत्येव हि भेदे इति। (भा)

यत्किञ्चित्प्रयत्नभेदे सत्येवेत्यर्थः॥

कुत एतदिति। (भा)

सूचाचरैस्तदलाभ इति प्रश्नः। समाधत्ते

भेदाधिष्ठाना हि इति। (भा)

यत्किञ्चित्प्रयत्नभेदेत्यर्थः॥ तत्र ज्ञापकमाह

यदि ह्रीति। (भा)

सवर्णसंज्ञावचनम् (भा)

इत्यस्य सवर्णपदोच्चारणमित्यर्थः। संज्ञा तु

---

१ झरो झरि सवर्णे। अ ८। पा ४। सू ६५॥

२ सत्येव हि भेदे सवर्णसंज्ञया भवितव्यम्। भाष्ये॥

(अ. १। पा. १। आ. ४) (तुल्यास्यप्रयत्नं सवर्णम् । १। १। ९।)

[1]अणुदित् सवर्णस्य (पा)

इत्याद्यर्थमावश्यकेति बोध्यम् ॥

भेदादिति । (कै)

बाह्यप्रयत्नभेदादित्यर्थः ॥ नन्वेवं यत्किञ्चित्स्थानैक्यादेकारौकारयोः सावर्ण्यापत्तिरितिचेन्न । ज्ञापकात् प्रयत्नांशे यावत्प्रयत्नसमानत्वत्यागेऽपि स्थानांशे तत्त्यागेमानाभाव इत्याशयात् ।

[2]यजुष्येकेषाम् (पा)

इत्यादिनिर्देशैः स्थानांशे यावत्स्थानतुल्यत्वविवक्षणाच्च । यत्तु तुल्यत्वस्य भेदघटितत्वात् सवर्णसंज्ञाभेदाधिष्ठानेत्यर्थ इति । तन्न । तेन सावर्ण्यनियामकप्रयत्नयोः स्थानयोश्च परस्परं भेदलाभेऽपि वर्णानां यत्किञ्चित्प्रयत्नभेदस्य ततोऽलाभात् । स्थानानामनन्ततस्तत् तत्कालरूपोपाधिभेदेन भेदो बोध्यः ॥ भाष्ये

यदि तर्हि सति भेदे (भा)

इत्यादि सिद्धान्ति वचः ॥

प्रकारच्छकारयोरिति । (भा)

तस्मात् प्रारम्भो यत्नस्येति आवश्यकमिति भावः ॥ ननु "निश्छ्वे"-त्यत्र हलः परत्वाभावात् कथं लोपप्राप्तिरत आह

---

१ अणुदित्सवर्णस्य चाप्रत्ययः । अ १ । पा १ । सू ६९ ॥

२ यजुष्येकेषाम् । अ ८ । पा ३ । सू १०४ ॥ "युष्मत् तत् ततक्षुष् परतः पदे सस्य मूर्धन्यो भवति" इत्यर्थः ॥

[1]अनचि चेति ॥ (पा)

तत्रैकदेशी प्रौढ्या समाधानमाह

एवं तर्हीत्यादि ॥ (भा)

स्वाङ्गवाच्येवेति । (कै)

[2]अमूर्द्धेत्यादि- (पा)

पर्युदासादेव स्वाङ्गे लब्धे स्वाङ्गादिति पुनः श्रुतिरवधारणार्थेति भावः । "संज्ञायाम्" इत्यनुवृत्तेर्न दोष इत्यन्ये ॥ नन्वेवं भिन्नस्थानानामपि स्यादत आह

तद्धितान्तास्येति । (कै)

आस्यपदोपादानसामर्थ्याच्च तद्धह इति भावः ॥

एकत्वं विवक्ष्यत इति । (कै)

तद्धितां विनापि प्रत्यासत्त्या प्रयत्नयोरेकास्यभववृत्तित्वलाभ इत्यन्ये। त्रिपदबहुव्रीहौ सप्तम्यन्तस्य पूर्वनिपातापत्तेः पूर्वपदार्थप्रधानतत्पुरुषस्याप्यगतिकगतित्वाद् भाष्ये तृतीय आश्रितः ॥

रेफोष्मेति । (कै)

"रेफोष्मणां सवर्णा न सन्ति" इत्युक्तेरिति भावः ॥

[3]तस्यावचनम् (भा)

इति वार्त्तिके तच्छब्देन कस्य परामर्शोऽत आह

---

१ अ ८। पा ४। सू ४७ ॥

२ अमूर्द्धमस्तकात् स्वाङ्गादकामे। अ ६। पा ३। सू १२ ॥

३ तस्यावचनं वचनप्रामाण्यात् ॥

[1]तस्येत्ययमिति। (कै)

तस्यावचनम् (भा)

इत्यत्र षष्ठीतत्पुरुष इति भावः। एवं च "स्थो न विभक्तिरि" तिलुगभावः। वस्तुतस्तच्छब्देन पूर्वोक्तस्य तस्य शब्दस्य परामर्श इति वक्तुं युक्तम्॥

रेफस्यापीति। (कै)

रेफोष्मणामित्येतद्विजातीयसवर्णाभावप्रतिपादनपरमित्यर्थः। तच्च रेफांशे तुल्यास्यप्रयत्नासम्भव एव ऊष्मसु तु

[2]नाज्झलौ (पा)

इति निषेधादिति बोध्यम्। एवं च व्यावर्त्त्याभावेन सवर्णसंज्ञावचनसामर्थ्याद् यस्य तस्येति लभ्यत इति भावः॥ ननु "सवर्ण" इति संज्ञाशब्दस्य कथं सम्बन्धिशब्दत्वमत आह

तुल्यास्येत्यादि। (कै)

स्वार्थभिन्नप्रतियोगिकसम्बन्धनिमित्तः शब्दः सम्बन्धिशब्द इति भावः॥ परेतु अत्र सूत्रे द्वन्द्वनिर्देशलभ्यौ तुल्यास्यतुल्यप्रयत्नशब्दौ इत्यर्थौ भाष्यस्य सवर्णशब्दो हि प्रदेशेऽपि सवर्णपदवत्परो न तु तुल्यास्यप्रयत्नत्वप्रवृत्तिनिमित्तक इति तस्य सम्बन्धिशब्दत्वं दुरुपपादमुपक्रमोपसंहाराभ्यां चैवमेवोचितम्। उपक्रमे हि

तुल्यास्यं च तुल्यप्रयत्नं च

---

१ तस्येत्ययमनुकरणशब्दः। तस्येत्यस्यावचनमित्यर्थः। कै॥

२ अ १। पा १। सू १०॥

(तुल्यास्यप्रयत्नं सवर्णम् । १। १। ९।) (अ. १। पा. १। आ. ४)

सवर्णसंज्ञं भवति (भा)

इत्युक्तमित्याहुः ॥

ऋकारऌकारयोरिति । (भा)

अत्र

[1]ऋत्यक (पा)

इति प्रकृतिभावः । वार्त्तिकेऽप्येवमेव पाठ इति प्रामाणिकाः ॥ सावर्ण्यप्रतियोग्यनिर्देशादाह

अच चेति ॥ (कै)

भाष्ये

होतृऌकारो होतृकार इति । (भा)

ऌकारशब्दो देवतावाचीत्येके । विवृतस्य ऌकारस्य दीर्घस्याभावाद्दकारो दीर्घ उदाहृत इति बोध्यम् ॥

नैतदस्तीति । (भा)

सवर्णसंज्ञाया इति शेषः ॥ नन्वौषत्स्पृष्टेन मुक्तेऽपि विवृतदीर्घः सवर्णसंज्ञां विना दुर्लभोऽत आह

तचेति ॥ (कै)

भाष्ये तद्वचनद्वयारम्भेऽपि सवर्णसंज्ञावश्यिकीत्याह

तत् सवर्णे इति ॥ (भा)

अज्माचस्येति । (कै)

अनज्ग्र्याद्वृत्त्यर्थमक इति वर्त्तते । सवर्णसंज्ञाभावात् सवर्ण इति नानुवर्त्तते इति भावः ॥ खण्डयति

---

१ अ ६ । पा १ । सू १२८ ॥

[1]यदेतदिति (भा)

भाष्ये ॥

सवर्ण इतीति। (कै)

अत्र वार्त्तिके सवर्णग्रहणमनुवर्त्तत इति भावः ॥

तेन ऌतीति। (कै)

सिद्धान्तेऽपि व्यवस्थितविभाषयाऽनभिधानेन वा होढ ऌकारे पूर्ववार्त्तिकं गन्तृ ऌकारे चोत्तरवार्त्तिकं न प्रवर्त्तते। एवं कृ इति दीर्घस्य ॠकारे परे पूर्वस्य तस्यैव ऌकारे उत्तरस्य चाप्रवृत्तिस्तत एवेति भावः ॥

रूपद्वयमिति। (कै)

ईषत्स्पृष्टघटितं विवृतदीर्घघटितं चेति भावः ॥

तचासंहितायामिति। (कै)

[2]समासे संहिता नित्या। असमासे तु ईदृग्रूपं दुर्लभम्। होढग्रब्दे विभक्तिश्रवणापत्तेः। होढग्रब्दस्य नपुंसके सम्बुद्धौ रूपमित्यप्यतिक्लिष्टमिति चिन्त्यम्। भाष्ये तु

---

१ यदेतत् सवर्णदीर्घत्वे ऋतीति एतदृत इति वक्ष्यामि। भाष्ये ॥

२ "संहितैकपदे नित्या नित्या धातूपसर्गयोः। नित्या समासे वाक्येतु सा विवक्षामपेक्षते" ॥ अत्रैकपदग्रब्देन अखण्डमभिप्रेतम्। अत एव नित्यासमास इति चरितार्थम्। अत एवाग्ने अग्ने इत्यादौ पदद्वित्वे संहिता अनित्यैव। अखण्डत्वं च पदत्वाभाववदुत्तरखण्डत्वं तेन राजीयतीत्यादौ न दोषः। अन्यथा तच्च पक्षे ग्रबेकादेग्रोऽपि न स्यादिति बोध्यम् ॥

होतृ ऌकार (भा)

इति दीर्घप्रवृत्तियोग्येदृशोच्चारणम् ॥ इति स्थिते इति शेषः । एवं "ग्राकल्ले होतृ ऌकार" इत्यपि चिन्त्यम् । सवर्णत्वविधायक-वचनाभावे एतद्विचारमात्रेण तत्र

ऋत्यक (पा)

इत्यस्याप्राप्तेः ।

[1]इकोऽसवर्णे (पा)

इत्यपि

[2]न समास (वा)

इति निषिद्धम् । नित्यग्रहणं तु तत्र भाष्ये प्रत्याख्यातमित्याऊः ॥ सवर्णसंज्ञावचनेनैकेनैव सिद्धे तद्वयं न कार्यमित्याह भाष्ये

तन्न वक्तव्यमिति ॥ (भा)

इतर आह

अवश्यमिति ॥ (भा)

अर्द्धतृतीयेति । (कै)

तावतापि स्थानप्रयत्नसाम्येन ताभ्यां ग्रहणं स्यादित्यरुचेराह

---

१ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च । ६ । १ । १२७ ॥

२ "न समासे" इति सिद्धान्तकौमुद्यामस्ति । वार्त्तिकपाठे तु "सित् (नित्य) समासयोः शाकलेप्रतिषेधः" इत्यस्ति ॥

(अ. १। पा. १। आ. ४) (तुल्यास्यप्रयत्नं सवर्णम्। १। १। ९।)

ईषत् स्पृष्टेति। (कै)

विवृतत्वाभावे उपस्थितरेफीयप्रयत्नत्यागे मानाभावादिति भावः॥

ताभ्यामिति। (कै)

असावर्णादिति भावः॥ भाष्ये वचनद्वयप्रत्याख्यानवाद्याह

ऋकारस्येत्यादि॥ (भा)

सत्यच्त्वे इति। (कै)

अयोगवाहेषु पाठादिति भावः॥

नाच् कार्य्यमिति। (कै)

तस्य प्लुतसंज्ञा। तत्स्थाने प्लुतस्येति भावः। अत्र पक्षेऽपि उक्तयुक्त्या ह्रस्वऋकारद्वयस्थानिकदीर्घैकादेशातिरिक्तविषये आद्यस्य ह्रस्व-ऋकारऌकारद्वयस्थानिकदीर्घैकादेशातिरिक्तविषये द्वितीयस्य न साधुत्वमिति नातिप्रसङ्गः। पक्षयोस्तुल्यफलता चेति बोध्यम्। तदेव ध्वनयन् पृच्छति भाष्ये

[1]किं पुनरचेति॥ (भा)

ऋकार इति। (कै)

विवृत इत्यर्थः॥

ऌकार इति।

ईषत्स्पृष्ट इत्यर्थः॥ भाष्ये

दीर्घत्वं चैव ह्रीति। (भा)

ईषत्स्पृष्टविवृतरूपो दीर्घो वर्ण इत्यर्थः। तद्व्याचष्टे

---

१ किं पुनरत्र ज्यायः। सवर्णसंज्ञावचनमेव ज्यायः॥

अपिचेत्यादिना ॥ (भा)

खट्वल्कार इति । (भा)

ह्रोढल्कार इत्यस्याप्युपलक्षणम् ॥ वचनस्य क्वाप्यदर्शनादाह

व्याख्यास्यामीति ॥ (कै)

अन्ये तु "लण्" सूत्रस्थाकारस्यानुनासिकत्वे

[1]अतो ल्रान्तस्य (पा)

इत्यत्र भगवान् पाणिनिर्लकारं नोच्चारयेत् । प्रत्याहारेणैव निर्वाहात् । तस्मादपूर्वं वचनं कार्य्यमित्येव भाष्याशय उचित इत्याहुः ॥

आन्तरेति । (कै)

रश्रुते रपरो लश्रुतेर्लपर इत्यर्थः ॥ सवर्णसंज्ञावादी तदभाववादिनं प्रति तवाप्यावश्यकं तदित्याह

तच्चावश्यमिति ॥ (भा)

लकारास्याण् लपर इत्येतत् ॥

साक्षादिति । (कै)

[2]रषाभ्याम् (पा)

इति वचनादित्यर्थः ॥ नन्वत्र लकाराभाव इत्यत आह भाष्ये

वर्णैकदेश इत्यादि ॥ (भा)

---

१ अ ७ । पा २ । सू २ ॥

२ रषाभ्यां नो णः समान पदे । ८ । ४ । १ ॥

(अ. १। पा. १। आ. ४) (तुल्यास्यप्रयत्नं सवर्णम् । १। १। ९।)

अग्रहणपक्षे त्विति । (कै)

[1]"प्रकृप्यमानमि"त्यत्र "क्लृप्यमानम्" इत्यत्र चेति भावः । आद्ये

[2]ऋत्यच (पा)

इति द्वितीये

[3]ऋवर्णान्नस्येति (वा)

प्राप्तिः ॥

भेदेनेति । (कै)

"ओणृ" "गल्लृ" इति भेदेनानुबन्धनिर्देशः ॥

[4]नाग्लोपिशास्वृदितां (पा)

[5]पुषादिद्युताद्ल्रदित (पा)

इति च भेदेनोपादानमित्यर्थः ॥

---

१ इह तर्हि "रषाभ्यां नो णः समानपदे" इत्यत्र ऋकारग्रहणं चोदितम् । मातृणां पितृणामित्येवमर्थम् । तदिहापि प्राप्नोति । क्लृप्यमानं पश्येति । अथासत्यामपि सवर्णसंज्ञायामिह कस्मान्न भवति प्रकृप्यमानं पश्येति । चुटुतुलशूर्व्यवाये नेति वक्ष्यामि । अपर आह । चिभिश्च मध्यमैर्वर्गैर्लशूसैश्च व्यवाये नेति वक्ष्यामीति ॥

२ अ ८ । पा ४ । सू २९ ॥

३ रषाभ्यां नो णः समानपदे (८ । ४ । १ ।) एतत् सूत्रस्यवार्त्तिकम् । रषाभ्यां णत्व ऋकारग्रहणम् ॥

४ अ ७ । पा ४ । सू २ ॥

५ पुषादिद्युताद्ल्रदितः परस्मैपदेषु । अ ३ । पा १ । सू ५५ ॥

नाज्झलौ । १ । १ । १० ॥

अकारेत्यादि । (कै)

एवं च हरिरित्यादौ दीर्घः शयनमित्यादौ यणापत्तिरिति भावः ॥

अत एवेति । (कै)

पूर्वसवर्णदीर्घनिर्देशादित्यर्थः । किं चैवं सति

[1]अकः सवर्णे (पा)

[2]झरो झरि सवर्णे (पा)

इत्यस्यासङ्गतिरित्यपि बोध्यम् ॥

भेदाधिष्ठानत्वादिति । (कै)

अक्यैक्ये हि तुल्यास्यप्रयत्नत्वासम्भव इति भावः ॥

सवर्णग्रहणेन (भा)

इति भाष्ये सवर्णग्राहकेण

[3]अणुदित् (पा)

सूत्रेणेत्यर्थः ॥

अच हि सूत्रे इति । (कै)

"उच्चारितस्यैव प्रत्यायकतां"चत्यपूर्वपक्षी न जानाति "प्रत्याहारेषु

---

१ अकः सवर्णे दीर्घः । अ ६ । पा १ । सू १०१ ॥

२ अ ८ । पा ४ । सू ६५ ॥

३ अणुदित्सवर्णस्य चाप्रत्ययः । अ १ । पा १ । सू ६८ ॥

जातिग्रहणम्" इति च न जानाति ॥ ननु सति सवर्णत्वे इकारः अकारं गृह्णीयात् तदेव च न

नाज्झलौ (पा)

इति निषेधादत आह

स्वात्मनीति । (कै)

यद्यपि "स्वाध्यायोऽध्येतव्य" इत्यात्मानमपि विषयीकरोतीति एकस्य विषयत्वविषयित्वयोर्न विरोधस्तथाप्येतदाक्यार्थबोधोत्तरमन्यत्र निषेधेऽपि स्ववाक्यार्थबोधात् प्राक् स्वघटकपदार्थोपस्थितिवेलायां स्ववाक्यार्थरूपसावर्ण्याभावज्ञानाभावान्नाचेकारअकारयोस्तद्भावबोधनमिति भावः ॥

[1]अपवादस्यैवासम्पत्त्येति । (कै)

अपवादस्य

नाज्झलौ (पा)

इत्यस्यासंपत्त्या प्राग्बोधाभावेन स्वविषयेऽप्राप्तौ तद्घटकपदोपस्थितयोरिकारअकारयोर्नापवादविषयत्वमित्यर्थः ॥

बहुलेति । (कै)

[2]मयूरव्यंसका- (पा)

दित्वात् [3]"सुप्सुपे"ति वा समास इत्युचितम् ॥ ननु कथं अस्य द्वित्वं

---

१ "अपवादत्वस्यैवासम्पत्त्या" इति कैयटेऽस्ति ॥

२ मयूरव्यंसकादयश्च । अ २ । पा १ । सू ७२ ॥

३ सह सुपा । अ २ । पा १ । सू ४ ॥ इत्यत्र 'सुपा' इति योगविभागेनेत्यर्थः ॥

[१]अनचि चेति (पा)

[२]शरोऽचीति (पा)

वा निषेधापत्तेरत आह

शरोऽचीति ॥ (कै)

ननु प्रयत्नभेदेनानच्त्वे सूचमेव व्यर्थं स्यादत आह

सूचेति ॥ (कै)

भाष्ये

[३]ईषदित्येवेति । (भा)

"एङैचोः" परस्परसावर्ण्याभावाय विवृतत्वव्याप्यानामपि सवर्णसंज्ञा-नियामकत्वस्य सूचमतेऽप्यावश्यकत्वेन तदाश्रित्य सूचानारम्भ एव ज्यायान्। किं च दीर्घप्लुताकारहकारयोः सावर्ण्यव्यावृत्तये इदमपि तस्यावश्यकमिति भावः ॥

---

१ अ ८। पा ४। सू ४७ ॥ २ अ ८। पा ४। सू ४९ ॥

३ अञ्झलोः प्रतिषेधे शकारप्रतिषेधोऽञ्झल्त्वात्। अञ्झलोः प्रतिषेधे शकारस्य शकारेण सवर्णसंज्ञायाः प्रतिषेधः प्राप्नोति। किं कारणम्। अञ्झल्त्वात्। अचैव हि शकारो हल् च। कथं तावदचत्वम्। इकारः सवर्णग्रहणेन शकारमपि गृह्णातीत्येवमचत्वम्। हल्षु चोपदेशाद्धल्त्वम्। तत्र को दोषः। तत्र सवर्णलोपे दोषः। तत्र सवर्णलोपे दोषो भवति। परशूतानि कार्याणि। झरो झरि सवर्णे इति लोपो न प्राप्नोति। सिद्धमनचत्वात्। सिद्धमेतत्। कथम्। अनचत्वात्। कथमनचत्वम्। स्पृष्टं करणं स्पर्शानाम्। ईषत्स्पृष्टमन्तस्थानाम्। विवृतमूष्मणाम्। ईषदित्येवानुवर्त्तते। स्वराणां च विवृतम्। ईषदिति निवृत्तम्। अचैव भाष्ये ॥

वाक्यापरिसमाप्तेर्वेति । (भा)

अन्यथा

नाज्झलौ (पा)

इत्यस्य निषेधस्य स्वस्मिन्नपि प्रवृत्तौ तव पूर्वपक्षस्यैवानुत्थानं स्यादिति भावः ॥ अनिष्पादमुपपादयति

अस्मिन् हीति ॥ (कै)

सूत्रे निष्पन्ने इति । (कै)

जनितवाक्यार्थबोधे इत्यर्थः ॥

प्रवर्त्तते इति । (कै)

एते परस्परं सवर्णसंज्ञा इति प्रमारूपं निश्चयज्ञानं निष्पद्यत इत्यर्थः । तदेव च लक्ष्यसंस्कारकमिति भावः ॥

निष्पत्त्यवस्थायाम् । (कै)

वाक्यार्थबोधावस्थायाम् ॥

सवर्णत्वेषु निष्पन्नेषु । (कै)

तच्च सवर्णत्वनिष्पत्तिरिष्टविषये सवर्णपदवाच्यत्वग्रहः ॥

नापि स्वात्मनीति । (कै)

अनिष्पत्तेरिति भावः ॥

अङ्गानिष्पत्त्या । (कै)

अङ्गस्येष्टविषयसवर्णपदवाच्यत्वज्ञानस्यानिष्पत्त्या ॥ भाष्ये

[1]तावत् । (भा)

प्रथमम् ॥

उपदेशोत्तरकालेति । (भा)

ज्ञातस्य संज्ञाविधानादिति भावः ॥

प्रत्याहारोत्तरकाला सवर्णसंज्ञा (भा)

इत्यादेरिष्टविषये सवर्णसंज्ञासंज्ञिलग्रहणं "तदुत्तरकालमणुदिदि"-त्येतदकारादिभिः स्वसवर्णत्वेन ज्ञातानां ग्रहणं बोधयतीत्यर्थः । अपरिसमाप्तिस्तु सवर्णनिर्णयं विना तद्ग्रहणबोधनासामर्थ्यमित्यर्थः । तज्ज्ञे शक्तिग्रहे बाधकसम्भावनोद्भिताऽप्रामाण्यसम्भावनासत्त्वादिति तात्पर्य्यम् ॥ यत्तु

नाज्झलौ (पा)

इत्यतः प्राक्

[2]तुल्यास्य (पा)

इत्यस्य बोधाभावेन सवर्णपदार्थज्ञानाभावाद्

---

१ वाक्यापरिसमाप्तेर्वा । वाक्यापरिसमाप्तेर्वा पुनः सिद्धमेतत् । किमिदं वाक्यापरिसमाप्तेरिति । वर्णानामुपदेशस्तावत् । उपदेशोत्तरकाला इत्संज्ञा । इत्संज्ञोत्तरकाल आदिरन्त्येन सहेतेति प्रत्याहारः । प्रत्याहारोत्तरकाला सवर्णसंज्ञा । सवर्णसंज्ञोत्तरकालमणुदित्सवर्णस्य चाप्रत्यय इति सवर्णग्रहणम् । एतेन सर्वेण समुदितेन वाक्येनान्यच्च सवर्णानां ग्रहणं भवति । अत्रैव भाष्ये ॥

२ अ १ । पा १ । सू ९ ॥

(अ. १। पा. १। आ. ४) (नाज्झलौ। १। १। १०।)

अणुदित् (पा)

दत्यस्य वाक्यार्थाबोध इत्यर्थ इति। तन्न। अभावज्ञाने प्रतियोगिज्ञानस्य कारणतया तुल्यास्येत्यतः प्राग् निषेधवाक्यार्थाभावो न तु विपरीतमित्यदोषादिति दिक्॥

सिद्धमिति। (कै)

अचत्याच्पदार्थोपस्थितिकाले वाक्यार्थबोधरूपसावर्ण्याभावज्ञानाभावादिकारग्रकारयोः सवर्णत्वज्ञानेऽ"णुदित्" सूत्रजस्येष्टविषये वाक्यार्थबोधरूपग्रक्तिग्रहस्याभावान्नेकारेणाच ग्रकारग्रहणमिति भावः॥ ननु वाक्यापरिसमाप्तिन्यायस्यास्मदादीन् प्रति प्रवृत्तत्वेऽपि पाणिनेस्तत्तच्छास्त्रप्रणयनान्यथानुपपत्त्या तत्तद्विषयज्ञानस्य प्रागपि सत्त्वावश्यकत्वेन तज्ज्ञानस्यैतच्छास्त्रासाध्यत्वेन च

नाज्झलौ (पा)

दत्यादौ सवर्णाभिप्रायेण प्रयोगः स्यात्। अस्मदादीनां बोधस्तु तत्तात्पर्य्यज्ञव्याख्याद्यपरम्परया लक्षणया भविष्यतीति ग्रकारयोः प्रतिषेधः प्राप्नोति एवमकारयोरपीति चेन्न। ज्ञानसत्त्वेऽपि तदभिप्रायेण प्रयोगे तात्पर्य्यग्राहकाभावात्। करिष्यमाणसंज्ञाद्यभिप्रायेण पाणिनिव्यवहाराभावस्यैव प्रतिपादनाच्च। अत एव [1]"हलन्त्य" सूत्रे दुतरेतराश्रयमाशङ्क्य एकशेषेण समाहितं भाष्ये। अन्यथा पाणिनिना हल्पदार्थस्य ज्ञातत्वेन तस्यान्योन्याश्रयाभावात् तेन तदभिप्रायेण प्रयोगे बोद्धृबोधस्य लक्षणयैवोपपत्तौ तत्पर्य्यन्तानुधावनमनर्थकं

---

१ हलन्त्यम्। अ १। पा ३। सू ३॥

स्यात्। मम तु पाणिनेस्तथा व्यवहाराभावान्नदोषः। उक्तार्थे ज्ञापकमप्युपन्यस्यति

[1]एवमीकारोऽपीति। (कै)

अत्र पचे दीर्घप्लुताकाराभ्यां हकारे सावर्ण्यवारणं तु प्रश्लेषाद्बोध्यम्। तत्र तात्पर्य्याद्दका

[2]वेलासु (पा)

दूत्यादिनिर्देशाः प्रागुक्तं भाष्यं चेति बोध्यम्॥

प्रदर्शनाय। (कै)

बोधनाय॥ भाष्ये

[3]यदेतदिति। (भा)

तद्बोधवेलायां वाक्यपरिसमाप्तेरिति भावः॥

[4]एकत्रेति। (कै)

"तुल्यार्थानां विकल्प" इति न्यायादित्यर्थः॥

---

१ एवमीकारोऽप्यचेकारेण न गृह्यत इतीकारश्चकारयोः सवर्णत्वमस्तीति कुमारी प्रेते इत्यत्र सवर्णदीर्घत्वं प्राप्तमचीत्यनुवृत्त्या निवार्य्यते॥

२ कालसमयवेलासु तुमुन्। अ ३। पा ३। सू १६७॥

३ नैष दोषः। यदेतदकः सवर्णे दीर्घ इत्यत्र प्रत्याहारग्रहणम्। तत्र इकारं ईकारं गृह्णाति ऋकारं न गृह्णाति। भा॥

४ एकत्र हि साध्ये हेतुविकल्पो भवति इह तु साध्यभेदः। सिद्धेरणच्त्वं हेतुः। अनच्त्वस्य वाक्यापरिसमाप्तिः॥

(अ. १। पा. १। आ. ४) (नाञ्झलौ । १। १। १०।)

[1]मा वा भूद् । (भा)

इत्येतत् सूचितप्रतिज्ञाया आश्रयमाह

[2]अस्तु वेति ॥ (कै)

ननु "व्यञ्जनपरस्यैकस्यानेकस्य वा नोच्चारणे विशेष" इति न्यायात् कथं भेद इत्यत आह

श्रुतिकृतमिति ॥ (कै)

भाष्ये

[3]असतिलोपे त्रिशकारमिति (भा)

वदन् प्रष्टव्यः किं द्विशकारकं न स्यादिति तवाशय उत त्रिशकारं स्यादिति । आद्ये आह

असत्यपीति । (भा)

द्विसकारं भवत्येवेत्यर्थः । द्वितीये आह

---

१ एतच्च समर्थितम् । कथम् । अस्तु वा शकारस्य शकारेण सवर्णसंज्ञा मा वा भूत् । भा ॥

२ अस्तु वा ग्रहणमिकारेण शकारस्येति वाक्यशेषाध्याहारात् प्रतिज्ञा-विकल्पार्थो वा शब्द इत्यर्थः ॥

३ ननु चोक्तं परशूतानि कार्याणि । झरो झरि सवर्णे इति लोपो न प्राप्नोति । माभूल्लोपः । ननु च भेदो भवति । सति लोपे द्विश-कारम् । असतिलोपे त्रिशकारम् । नास्ति भेदः । असत्यपि लोपे द्विशकारमेव । कथम् । विभाषाद्विर्वचनम् । एवमपि भेदः । असति लोपे कदाचित् द्विशकारं कदाचित् त्रिशकारं सति लोपे द्विशकार-मेव । स एष कथं भेदो न । स्यात् यदि नित्यो लोपः स्याद् विभाषा तु स लोपः । यथा भेदस्तथास्तु । अत्रैव भाष्ये ॥

एवमपीति । (भा)

विभाषा द्विर्वचनेऽपीत्यर्थः । एवमपीत्यर्थेन भेद एवेत्युक्ता तदुपपादनावसरे यदि लोपो न स्यादिति वाच्यं किमुच्यते नित्यो लोपः स्यादिति अतश्छित्वा भिन्नकर्तृकत्वेन योजयति ॥

स एष इति । (भा)

चिग्रकारमिष्टमेवेति तात्पर्य्यम् ॥

[1]झयो ह इति । (पा)

इदं वृत्तिरीत्या । भाष्यरीत्या तु

[2]वावसान (पा)

इत्यत इति बोध्यम् ॥

इति कालोपनामकशिवभट्टसुतसतीगर्भज-
नागोजिभट्टकृते महाभाष्यप्रदीपोद्योते
प्रथमाध्यायस्य प्रथमे पादे
चतुर्थमाह्निकम् ॥

---

१ झयो होऽन्यतरस्याम् । अ ८ । पा ४ । सू ६२ ॥

२ वावसाने । अ ८ । पा ४ । सू ५६ ॥

Nyayabindutikā, (Text)	Rs.	0 10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each		3 6
Padmawati Fasc. 1–3 @ 2/		6 0
Pariçista Parvan. (Text) Fasc. 1–5 @ /6/ each		1 14
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each		1 14
Ditto (English) Part II, Fasc. 1		0 12
Prākrta Laksaṇam, (Text) Fasc. 1		1 8
Parāçara Smrti, (Text Vol. I. Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–5 @ /6/ each		7 2
Parāçara, Institutes of (English)		0 12
Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each		2 4
*Sāma Vēda Saṁhitā. (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.		12 6
Sāṅkhya Sūtra Vṛtti. (Text) Fasc. 1–4 @ /6/ each		1 8
Ditto English) Fasc. 1–3 @ /12/ each		2 4
Suçruta Saṁhitá. (Eng.) Fasc. 1 @ /12/		0 12
*Taittereya Saṁhitā. (Text) Fasc. 12–45 @ /6/ each		12 12
Tāṇḍya Brāhmaṇa, (Text Fasc. 1–19 @ /6/ each		7 2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–9 @ /6/ each		13 8
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/		0 12
Tul'si Sat'sai. (Text) Fasc. 1–5 @ /6/ each		1 14
Upamiti-bhava-prapañca-kathā (Text) Fasc. 1-2 @ /6/ each ...		0 12
Uvāsagadaśāo. (Text and English) Fasc. 1–6 @ /12/		4 8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each		5 4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each		4 8
Visnu Smrti, (Text) Fasc. 1–2 @ /6/ each		0 12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each		2 10
Vrhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/		2 4
Vrhat Svayambhū Purāṇa, Fasc. 1–5		1 14

Tibetan Series.

Pag-Sam Thi S'iñ, Fasc. 1–4 @ 1/ each		4 0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each		13 0
Rtogs brjod dpag hkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–5 @ 1/ each		10 0

Arabic and Persian Series.

'Ālamgirnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...		4 14
Al-Muqaddasi (English) Vol. I. Fasc. 1–2 @ /12/		1 8
Āīn-i-Akbarī. (Text) Fasc. 1–22 @ 1/ each		22 0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each		29 12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each		37 0
Ditto English Fasc, 1–5 @ 1/ each		5 0
Arabic Bibliography, by Dr. A. Sprenger		0 6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each		7 2
Catalogne of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each		3 0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each		21 0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each		14 0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each		3 0
Futūh-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each		3 8
Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each		1 8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...		0 12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each		4 8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each		1 2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38 4
Maāsir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1–10; Index to Vol. I, Fasc. 10–11; Index to Vol. III, Fasc. 11–12; Index to Vol. II, Fasc. 10–12 @ /6/ each		13 2

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Maghāzi of Wāqidi, (Text) Fasc. 1–5 @ /6/ each ...	Rs.	1	14
Muntakhabu-t-Tawārikh, (Text) Fasc. 1–15 @ /6/ each		5	10
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1–7; and 2 Indexes; Vol. II, Fasc. 1–5 and Index; Vol. III, Fasc. 1 @ /12/ each ...		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each		7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each		1	8
Riyāzu-s-Salātin, (Text) Fasc. 1–5 @ /6/ each		1	14
*Suyuty's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each		4	0
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Fasc. 1–14 @ /12/ each		10	8
Ditto Index		1	0
Tārikh-i-Firūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...		2	10
Tārīkh-i-Firuzshāhi, of Shams-i-Sirāj Aif, (Text Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Wīs o Rāmīn, (Text) Fasc. 1–5 @ /6/ each		1	14
Zafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882. (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10). 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	General Cunningham's Archæological Survey Report for 1863–64 (Extra No., *J. A. S. B.*, 1864)	2	0
	A sketch of the Turki Language as spoken in Eastern Turkistan by R. B. Shaw (Extra No., *J. A. S. B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J. A. S. B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J. A. S. B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J. A. S. B.*, 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Iṣṭilāḥāt-uṣ-Ṣūfīyah, edited by Dr. A. Sprenger, 8vo.	1	0
9.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
10.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
11.	Khizānatu-l-'ilm	4	0
12.	Mahābharata, Vols. III and IV, @ 20/ each	40	0
13.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
14.	Sharaya-ool-Islām	4	0
15.	Tibetan Dictionary, by Csoma de Körös	10	0
16.	Ditto Grammar „ „	8	0
17.	Kaçmiraçabdāmṛta, Parts I & II @ 1/8/	3	0

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

16-1-1900

Books are supplied by V-P. P.

PK
531
A15
1899
v.1
pt.3

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

Pātañjali
Mahabhasyapradipodyotah